गणितः स शोभाकार्यैव न भवतीति द्वितीयः। (३) अथ शोभाकारी भवति तर्हि अस्मदुक्त एव गुणे वाऽलंकारे वाऽन्तर्भवति, नामान्तरकरणे तु कियदिदं पाण्डित्यम्। अथाप्युक्तेषु गुणेषु अलंकारेषु वा नान्तर्भावः, तथापि किंचिद्विशेषलेशमाश्रित्य नामान्तकरणम्, उपमाविच्छित्तिप्रकाराणामसंख्यत्वात्। तथापि गुणालंकारव्यतिरिक्तत्वाभाव एव। तावन्मात्रेण च किं कृतम्? अन्यस्यापि वैचित्र्यस्य शक्योत्प्रेक्षत्वात्। चिरन्तनैर्हि भरतमुनिप्रभृतिभिर्यमकोपमे एव शब्दार्थालंकारत्वेनेष्टे, तत्प्रपञ्चदिक्प्रदर्शनं तु अन्यैरलंकारकारैः कृतम्। तद्यथा 'कर्मण्यण्' इत्यत्र कुम्भकाराद्युदाहरणं श्रुत्वा स्वय नगरकारादिशब्दा उत्प्रेक्ष्यन्ते। तावता क आत्मनि बहुमानः? एवं प्रकृतेऽपीति तृतीयः प्रकारः॥"—°*Locana.* The first of these sub-contentions is discussed in this passage. "शब्दार्थशरीरं ....काव्यम्"—शब्द and अर्थ constitute the body of poetry, *Vide* Daṇḍin's *Kāvyādarśa*, I. 10: शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली". Also, Bhāmaha—"शब्दार्थौ सहितौ काव्यम्"—*Kāvyālaṁkāra*, I. 16. The position of these Negativists (अभाववादिन्) might be expressed thus: All are agreed on the point that शब्द and अर्थ make up the body of poetry. And we have already recognized the elements that enhance the beauty of the poetic creation by embellishing शब्द and अर्थ. For example, figures of speech like अनुप्रास and उपमा adorn शब्द and अर्थ respectively. We have recognized, too, गुण's like माधुर्य, etc., that belong to the particular arrangement of sounds (वर्णसंघटना). We have also heard of such *vṛttis* as उपनागरिका, etc., viz. परुषा or नागरिका, उपनागरिका or ललिता and कोमला or ग्राम्या—which, in fact, are not different from अनुप्रास and are merely varieties of the same

and as such can be reasonably subsumed under the latter :[1] *Rītis* like वदर्भी, गौडी and पाञ्चाली, that are not independent of गुण's like माधुर्य, etc., have also come to our notice. What then is this novel element called ध्वनि, which you

[1] Bhāmaha recognizes two different varieties of अनुप्रास, ग्राम्यानुप्रास and उपनागरिकानुप्रास (though not mentioned by name). *Vide Kāvyālaṁkāra*, II, 5-6. Udbhaṭa recognizes three different वृत्ति's—ग्राम्या, उपनागरिका and परुषा. His definitions and illustrations of these three वृत्ति's are as follows :—

(१) शषाभ्यां रेफसंयोगैष्टवर्गेण च योजिता ।
परुषा नाम वृत्तिः स्यात्ह्लह्ल‌ह्माद्यैश्च संयुता ।।
तत्र तोयाशयाशेषव्याकोशितकुशेशया ।
चकाशे शालिकिंशारुकपिशाशामुखा शरत् ।।

(२) सरूपसंयोगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः ।
स्पर्शैर्युतां च मन्यन्ते उपनागरिकां बुधाः ।।
सान्द्रारविन्दवृन्दोत्थमकरन्दाम्बुबिन्दुभिः ।।
स्यन्दिभिः सुन्दरस्यन्दं नन्दितेन्दिन्दिरा क्वचित् ।।

(३) शेषैर्वर्णैर्यथायोगं कथितां कोमलाख्यया ।
ग्राम्यां वृत्तिं प्रशंसन्ति काव्येष्वादृतबुद्धयः ।।
केलिलोलालिमालानां कलैः कोलाहलैः क्वचित् ।
कुर्वती काननारूढश्रीनूपुररवभ्रमम् ।।
सरूपव्यञ्जनन्यासं तिसृष्वेतासु वृत्तिषु ।
पृथक् पृथगनुप्रासमुशन्ति कवयः सदा ।।—

Udbhaṭa's काव्यालंकारसारसंग्रह, pp. 5-6. (*Bombay Sanskrit Series* Edn.) For an etymological meaning of the term वृत्ति, compare °*Locana* : "तथाहि अनुप्रासानामेव दीप्त-मसृण-मध्यमवर्णनीयोपयोगितया परुषत्व-ललितत्व-मध्यमत्वस्वरूपविवेचनाय वर्गत्रयसम्पादनार्थं तिस्रोऽनुप्रासजातयो वृत्तय इत्युक्ताः । वर्तन्ते अनुप्रासभेदा आसु इति ।..." —p. 17. Abhinavagupta reminds us that Bhāmaha does not mention the term वृत्ति in his treatise but recognizes only ग्राम्यानुप्रास and उपनागरिकानुप्रास, while, though it has been

are striving to raise to the highest position and endeavouring to show as being quite different from the existing elements of poetry like गुण's and अलङ्कार's ?[1] Thus according to these dissenters, गुण's and अलङ्कार's alone can make a

---

first used by Udbhata still he identifies the three वृत्ति's with three different varieties of अनुप्रास. This shows that वृत्ति's are not essetially different from अनुप्रास. *Vide* : अनतिरिक्तत्वादेव वृत्तिव्यहारो भामहादिभिर्न कृतः । उद्भटादिभिः प्रयुक्तेऽपि तस्मिान्नार्थः कश्चिदधिको हृदयपथमवतीर्ण इप्यभिप्रायेणाह--गताः श्रवणगोचरम् इति ।--°*Locana*. p. 19. Rudraṭa, however, recognizes five different वृत्ति's—viz. मधुरा, प्रौढा, परुषा, ललिता and भद्रा, as against the above three mentioned by Udbhaṭa. Namisādhu, the commentator, quotes a Prakrit author called Hari, who enumerates eight different वृत्ति's : तथाहि अष्टौ हरिणोक्ताः । यथा --'महुरं परुसं कोमलमोजस्सि निट्ठुरं च ललियं च । गंभीरं सामण्णं च अद्धभणिति उन्नायच्चा ॥"--Rudraṭa's *Kāvyālamkāra*, p. 17 (NSP Edn)

[1] We are to note that ancient authors like Daṇḍin and Vāmana, etc., recognized two separate elements called गुण's and अलंकार's. It is in Vāmana that we meet with an attempt to draw a clear-cut line of division between the two. As he states : काव्यशोभायाः कर्त्तारो धर्मा गुणाः । तदतिशयहेतवस्तु अलंकाराः ।

But Daṇḍin, who is older, seems to confound them, as Bhoja, the author of the सरस्वतीकण्ठाभरण, notes. As he remarks : "नानालंकारसंसृष्टेः प्रकाराश्च रसोक्तयः" इत्युक्तम् । तत्र "अलंकारसंसृष्टेः" इतीयत्येव वक्तव्ये नानालंकारग्रहणं गुणरसानामुपसंग्रहार्थम् । तेषामपि हि काव्यशोभाकरत्वेन अलङ्कारत्वात् । यदाह—"काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते । ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥ काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः । साधारणमलंकारजातमन्यत् प्रदर्श्यते ॥"—(काव्यादर्श) । तत्र 'काव्यशोभाकरान्' इत्यनेन श्लेषोपमादि-वद् गुण-रस-भाव-तदाभास-प्रशमादीनप्युपगृह्णाति । मार्गविभागकृद्गुणानाम-

poetic art beautiful and attractive, and as ध्वनि can be includ-ed under neither of these two elements, it is *prima facie*

लंक्रियोपदेशेन श्लेषादीनां गुणत्वमिवालंकारत्वमपि ज्ञापयति ॥"—*Op. cit.* pp. 703-704 (NSP. Edn.). *Vide* also Taruṇvācaspati's comments on *Kāvyādarśa*, II. 3. But Bhoja's interpretation of the *Kāvyādarśa* text itself seems to be based on misconception, and it can be explained in a way so that the distinction between गुण's and अलंकार's, which is so fundamental according to Daṇḍin's view, remains, as originally intended. As Vidyābhūṣaṇa Pandit Rangacaryya Raddi Shastri observes in his own comm. : एवं सामान्यतः अलंकारनिरूपणे प्रतिज्ञाते प्रसङ्गतः पूर्वं निर्णीतानामलंकाराणां पुनर्निरूपणं पिष्टपेषणवद् विफलं स्यादिति तान् परिहृत्यैव निरूपणं क्रियते इति कथयति—काश्चिदिति । काश्चित् श्रुत्यनुप्रास-यमकादयः । अलंक्रियाः शब्दालंकाराः । मार्गविभागार्थम् गौडवैदर्भमार्गयोर्वै-सादृश्यद्योतनार्थम् । प्रागपि प्रथमपरिच्छेदे । उक्ताः । तत्र श्रुत्यनुप्रासः ५२ श्लोकेन वृत्त्यनुप्रासः ५५ श्लोकेन यमकं च सामान्यतः ६१ श्लोकेन निर्दिष्टम् । तत्प्रयोजनं तु श्रुत्यनुप्रासो वैदर्भैरङ्गीकृतः न गौडैरित्यादिना मार्गभेदकथनम् । अतः तेऽलंकाराः न पुनर्निरूप्यन्ते इति भावः । अन्यत् पूर्वोक्तात् अन्यत् । साधारणमुभयमार्गसमानम् । गौडवैदर्भानुमतमित्यर्थः । अलंकारजातम् स्वभावख्यानमुपमा इत्यादिना अग्रे निरूप्यमाणोऽलंकारसमूहः । प्रदर्श्यते विविच्यते । यमकस्य पूर्वं सामान्यतः लक्षणमुक्तम् । तद्विशेष-प्रकारनिरूपणं तु—तत् तु नैकान्तमधुरमतः पश्चाद् विधास्यते । (१.६१) इति पूर्वप्रतिज्ञानुरोधेनैव तृतीयपरिच्छेदे सोदाहरणं प्रपञ्चितमस्तीति ज्ञेयम् ।—p. 114. (Bhandarkar Oriental Research Institute. Government Oriental Series, Class A, No. 4). *Vide* also MM. Premcand Tarkvāgis'a's comments on KD., II. 3. As for Udbhaṭa's view, compare Rüyyaka's *Alaṁkāra-sarvasva* : उद्भटादिभिस्तु गुणालंकाराणां प्रायशः साम्यमेव सूचितम् ।—p. 7. We should note also the statement of Udbhaṭa, which has been cited by Mammaṭa in his *Kāvyaprakās'a*, Chap. VIII : एवं च समवायवृत्त्या शौर्यादयः संयोगवृत्त्या हारादय इत्यस्तु गुणालंकाराणां भेदः ।

impossible to recognize the claim of ध्वनि to the rank of a decorative element in poetry, and to the highest position at that.

TEXT

§४। अन्ये ब्रूयुः—नास्त्येव ध्वनिः। प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः। सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्। न चोक्तप्रस्थानातिरेकिणो मार्गस्य तत् संभवति। न च तत्समयान्तःपातिनः सहृदयान् कांश्चित् परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्त्तितोऽपि सकलविद्वन्मनोग्राहितामवमम्बते॥

EXPOSITION

§4. Others might argue: 'There is no such element as ध्वनि or *suggested sense*. For, to be true poetry it must conform to the prevalent standards of poetic composition. Otherwise it would fail to charm the connoisseurs of poetic art. And ancient critics like Bhāmaha, Daṇḍin, Udbhaṭa, Vāmana, etc., recognize as true poetry only those compositions which have their शब्द and अर्थ beautified by the गुण's and अलंकार's unanimously agreed upon. But, you, who are going to posit ध्वनि, deviate from these established standards and would not even blush to call a composition true *kāvya* even though it might lack गुण's and अलंकार's (as in गतोऽस्तमर्कः.)[1] So it is

---

ओजःप्रभृतीनामनुप्रासप्रभृतीनां च उभयेषां समवायवृत्त्या स्थितिः—इत्यभिधानमसत्।—According to Hemacandra this is a citation from Udbha'a's भामहविवरण. *Vide*: इति भामहविवरणे यद्भट्टोद्भटोऽभ्यधात् —काव्यानुशसनटीका, p. 17.

[1] Cp. लक्षणे गुणालंकारादिनिवेशोऽपि न युक्तः। "उदितं मण्डलं विधोः" इति काव्ये दूत्यभिसारिकाविरहिण्यादिसमुदीरितेऽभिसरणविधिनिषेधजीवनाभावादिपरे "गतोऽस्तमर्कः" इत्यादौ च अव्याप्त्यापत्तेः। न चेदमकाव्यमिति

mere obstinacy to assert ध्वनि to be the soul of poetry (काव्यात्मा), as it throws overboard the recognized norms of poetic criticism.'

उक्तप्रस्थानातिरेकिणो मार्गस्य—reference to the ध्वनिमार्ग Abhinavagupta explains it as : नृत्तगीताक्षिनिकोचनादिप्रायस्येत्यर्थः। If suggestion (व्यञ्जना) or the suggested meaning (व्यङ्ग्य) were something different from word and sense it would fall outside poetry, which consists of word and sense. The extra-verbal acts or their meaning are not poetry whatever else they might be, just as the dance, musical tune, gesticulations and movements of the eyes, ogling, etc., though they communicate a meaning, agreeable or otherwise, are not instances of poetry.

न च तत्समयान्तःपातिनः......अवलम्बते—Now, the followers of the Dhvani school might confute the arguments of the Negativists by asserting that though ध्वनि might not be recognized by the opponents, yet those who are affiliated to this school and who are true सहृदय's would regard ध्वनि as the best kind of poetry, and as such it matters very little whether the opponents agree to it or not. This, the opponents state, is not the sound way of reasoning. For ध्वनि is merely a chimera, and no definition, howsoever ingeniously devised it might be, can make an imagination a reality. As Abhinavagupta so humorously puts it : "ननु ये तादृशमपूर्वं काव्यरूपतया जानन्ति त एव सहृदयाः। तदभिमतत्वं च नाम काव्यलक्षणम् उक्तप्रस्थानातिरेकिण एव भविष्यतीत्याशङ्क्याह—न चेति। यथा हि खड्गलक्षणं करोमीत्युक्त्वा 'आतान-वितानात्मा प्राव्रियमाणः

शक्यं वदितुम्। काव्यतया पराभिमतस्यापि तथा वक्तुं शक्यत्वात्। काव्य-जीवितं चमत्कारित्वं चाविशिष्टमेव॥—Jagannātha-Paṇḍita's रसगङ्गाधर. पृ. ७ (NSP. Edn.).

सकलदेहाच्छादकः सुकुमारश्चित्रतन्तुविरचितः सवर्तन-विवर्तनसहिष्णुः अच्छेदकः सुच्छेद्य उत्कृष्टः खड्ग' इति ब्रुवाणः, परैः 'पटः खल्वेवंविधो भवति न खड्ग' इत्यत्रयुक्ततया पर्यनुयुज्यमान एवं ब्रूयात्—'ईदृश एव खड्गो ममाभिमत' इति, तादृगेवैतत्। प्रसिद्धं हि लक्ष्यं भवति न कल्पितम् इति भावः।"—°*Locana*, p. 23.

TEXT

§५। पुनरपरे तस्याभावमन्यथा कथयेयुः—न सम्भवत्येव ध्वनिर्नामापूर्वः कश्चित्। कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात्। तेषामन्यतमस्यैव वा अपूर्वसमाख्यामात्रकरणे यत्किञ्चन कथनं स्यात्। किंच वाग्विकल्पानामानन्त्यात् सम्भवत्यपि वा कस्मिंश्चित् काव्य-लक्षणविधायिभिः प्रसिद्धैरप्रदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति यदेतदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते, तत्र हेतुं न विद्मः। सहस्रशो हि महात्मभिरन्यैरलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च। न च तेषामेषा दशा श्रूयते। तस्मात् प्रवादमात्रं ध्वनिः। न त्वस्य क्षोदक्षमं तत्त्वं किंचिदपि प्रकाशयितुं शक्यम्। तथा चान्येन कृत एवात्र श्लोकः—

"यस्मिन्नस्ति न वस्तु किंचन मनःप्रह्लादि सालंकृति
व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत्।
काव्यं तद् ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो
नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः॥"

EXPOSITION

§5. Now the Dhvani theorists might argue: 'Let ध्वनि be included under गुण's or अलंकार's. That is quite immaterial and does not shake our position in the least. For, though ध्वनि might be regarded as one of the numerous figures

of speech, still none of our predecessors had termed it as such or raised it to the position of the soul of poetic art.[1] And it is for the first time that we do so, and as such we can reasonably claim the credit due for this innovation.' To this the Negativists (अभाववादिन्'s) might reply : 'If you admit ध्वनि to be merely a variety of गुण or अलंकार, there is no justification for raising such a hue and cry for merely giving a new appellation to some already existing अलंकार. You might call a घट a कलश, but that would not add anything to our knowledge. And if you succeed in discovering a new turn of expression or a new shade of meaning it would be only a new figure of speech. It is a fact that the list of figures is being continually swelled by the speculations of critics. But that does not warrant such a fanfare. The discovery of a new figure or the invention of a new structure of speech may be creditable indeed. But it exceeds all limits of decorum and modesty to claim that the discovery is of a major principle which escaped the ancient doctors.' "तेषामन्यतमस्यैव ......स्यात्"—"न तु प्रज्ञातिशयवतां 'प्राज्ञा वस्तुनि युध्यन्ति न तु सामयिके ध्वनौ' इति नीत्या नाम्नि विवादो युक्तः।"—Jayaratha's विमर्शिनी, p. 120. किञ्च....विघ्नः—Even if the ancient authors failed to notice any peculiarity which you may name ध्वनि, still it is not proper, on the part of the Dhvani theorists, to wax eloquent in self-approbation and to raise such a pother over their achievement. For as the modes of expression are infinitely varied,[2] it is humanly impossible to exhaust the list

---

[1] As Abhinavagupta puts it : ननु भवत्यसौ चारुत्वहेतुः शब्दार्थगुणालंकारान्तर्भूतश्च। तथापि ध्वनिरित्यमुया भाषया जीवितमित्यसौ न केनचिदुक्त इत्यभिप्रायमाशङ्क्य तृतीयमभाववादमुपन्यस्यति।—*loc. cit.*

[2] Cf. "आसंसारमुदारैः कविभिः प्रतिदिनगृहीतसारोऽपि। अद्याप्यभिन्नमुद्रो विभाति वाचां परिष्यन्दः॥"—Quoted by Rājaśekhara in

of अलंकार's and गुण's and, as such, if a new figure of speech be discovered it does not behove one to be devoid of all sense of decorum and dance frantically on that account. As Daṇḍin states : 'काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते। ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥" *Kāvyādarśa*, II. 1. सहस्रशो हि....प्रकाश्यन्ते च—Bharata in his *Nāṭyaśāstra* defined only four अलङ्कार's—viz. उपमा, दीपक, रूपक and यमक, while writers on poetics like Daṇḍin, Medhāvin, Bhāmaha and others discovered a good many additional figures, so that the number of figures of speech reaches well over sixty in later works like the *Sāhityadarpaṇa*.[1] Compare also Bhāmaha's statement इति निगदितास्तास्ता वाचामलंकृतयो मया। बहुविधकृतीर्दृष्ट्वाऽन्येषां स्वयं परितर्क्य च ॥—*Kāvyālaṁkāra*, V. 69. तस्मात् प्रवादमात्रं......शक्यम्—So ध्वनि is merely a figment, and cannot stand critical test. तथा....श्लोकः—The verse, as Abhinavagupta records, is by Manoratha, a poet

---

his काव्यमीमांसा। Compare also रसगङ्गाधर—"वाग्भङ्गीनां तु पर्यालोचने एकस्मिन्नेव विषयेऽनन्तप्रकारः सम्पद्यते, किमुत विषयभेदे। यथा—"इह भवद्भिरागन्तव्यम्" इति विषये "अयं देशोऽलंकर्त्तव्यः" इति, "देशस्यास्य भाग्यान्युज्जीवनीयानी"ति, "तमांसि तिरस्करणीयानी"ति, "अस्मन्नयनयोः संतापो हरणीय" इति, "मनोरथः पूरणीय" इत्यादिः ॥—p. 556.

[1] So late a writer as Viśvanatha himself is credited with the discovery of a new figure of speech called निश्चय which is defined as : "अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः" (X. 39), and he illustrates it by—" वदनमिदं न सरोजम्....", etc. Note also his arguments in favour of its recognition as an altogether novel figure which he winds up with the remark : इति पृथगेवायमलंकारश्चिरन्तनोक्तालंकारेभ्यः—*Sāhityadarpaṇa*, p. 29 (Kane's Edn.).

and contemporary of Ānandavardhana : "तथा चान्येनेति—ग्रन्थकृत्समानकालभाविना मनोरथनाम्ना कविना।"[1] The verse records a sarcastic fling at the Dhvani theorists, for their departure from the traditional views on poetry. Vidyādhara, in his *Ekāvalī*, faithfully reproduces Ānandavardhana's statements recording the views of the अभाववादिन्'s though in some cases he adds a few fresh arguments of his own. We give below the relevant extracts from the *Ekāvalī* : शब्दार्थवपुस्तावत् काव्यं, वपुषि च केनाप्यात्मना भवितव्यम्, आत्मा च ध्वनिरेव, तस्य चाभावं मन्यमाना लोकायतिका इव केचन नास्ति ध्वनिरित्याचक्षते। ....ननु ध्वनिर्नास्तीति प्रतिज्ञाविरोधः। ध्वनिरित्यनेन विधिः, नास्तीत्यनेन च निषेधः, तयोश्च परस्परविरुद्धयोरेकस्मिन् धर्मिणि तिमिरातपयोरिव सहानवस्थानदुःस्थयोरेव निवारितत्वात्। न चात्र विरोधपरिहारप्रयोजकयोः देशकालयोरन्यतरस्याप्युपादानमस्ति येन विरोधः समाधीयेत। किं च प्रतीतः प्रतिषिध्यते ध्वनिरप्रतीतो वा। आद्येऽपि "क्वचिन्नास्ति", "क्वचिदपि नास्ती" -ति वा। प्रथमे

---

[1] Compare MM. Kane's comments on this remark of Abhinavagupta : 'An additional argument for asserting that the theory of ध्वनि in poetry had been pronounded before आनन्दवर्धन is this that आनन्द° quotes a verse which the लोचन ascribes to मनोरथ, a contemporary of आनन्द° in which the theory of ध्वनि is ridiculed—'काव्यं तद्ध्वनिना....ध्वनेः।' *Vide* राजतर° (IV. 497) for मनोरथ and others and IV. 671—"मानी मनोरथो मन्त्री परं परिजहार तम्." The सुभा° (51, 58, 440) quotes verses of a मनोरथ. If this मनोरथ is identical with the मनोरथ who flourished in the reign of जयापीड (which does not look likely) the ध्वनिकारिका's were composed between 800-815. Perhaps the लोचन is somewhat wrong in making आनन्द° a contemporary of मनोरथ.'—*History of Alaṁkāra Literature*, LXIV.

सिद्धसाधनम् । अस्माभिरपि ध्वनेः क्वाचित्कनिषेधप्रतियोगित्व-स्याभ्युपगतत्वात् । न द्वितीयः । प्रतीतस्य सार्वत्रिकनिषेधप्रति-योगित्वे व्याघातात् ।। अथ लब्धसत्ताक एव ध्वनिस्तथापि यदि न करोति काव्यस्य कामनीयकम्, तर्हि किमनेन अजागलस्तनायमानेन । उतस्वित् करोति, तर्हि गुणालंकारान्तर्भूत एव। तथाविधस्य च नामान्तरकरणे नैपुणं कियन्नाम । अत्रानुमानमपि। ध्वनिर्गुणालंकारेभ्यो न व्यतिरिच्यते । चारुताहेतुत्वात् । यदेभ्यो व्यतिरिच्यते न तच्चारुताहेतुः । अविमृष्टविधेयांशादिदोषवत् । चारुताहेतुश्च ध्वनिः। ततो न व्यतिरिच्यते तेभ्यः—इति ।। ननु गुणालंकार-व्यतिरिक्ता अपि रीतयो वृत्तयश्च यथा चारुताहेतवस्तथैव ध्वनिरपि भवतीति चेदुच्यते तत्र विचारानुगुणम । गुणातिक्रमेणोपजातमहिमानः कथमपि न भवन्ति रीतयः । वृत्तयस्तावत् अलंकारान्तर्भूता एव परुष-मधुर-मध्यमार्थनिरूपणाय दीप्त-मसृण-मध्यमवर्णारब्धानां तासा-मनुप्रासजातिरूपतयाऽभ्युपगमात् । जातिस्तु जातिमतो नातिरिच्यते । तस्मादभिधाव्यापारवैचित्र्यानन्त्यात् चारुत्वविधायिनः संभवतोऽपि सामान्यलक्षणेनैव परिगृहीतत्वात् चिरन्तनैः पृथक्त्वेनाप्रदर्शितस्य गुणलंकारयोरन्यतरस्य कस्यचित् ध्वनिरिति पारिभाषिकं नामान्तरं विधाय यदेतन्निरतिशयतर्कताटङ्कितशेमुषीकत्वमात्मनः ताण्डवयितु-मुद्युञ्जते भवन्तस्तत्र को वेद किं निमित्तमिति ।।—*Op. cit.*, pp. 23-29. (*Bombay Sanskrit Series* Edn.)

TEXT

§६। भाक्तमाहुस्तमन्ये। अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः। यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षण-विधायिभिर्गुणवृत्तिरन्यो वा न कश्चित् प्रकारः प्रकाशितः, तथापि अमुख्यवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्टोऽपि न लक्षित इति परिकल्प्यैवमुक्तम्—"भाक्तमाहुस्तमन्ये" इति ॥

EXPOSITION

§ 6. भाक्तम्--भक्ति+अण्. भक्ति is used here as a synonym of लक्षणा and गौणी, which are two different वृत्ति's according to the Mīmāṁsakas. It is explained by Abhinavagupta to refer to both : (१) भज्यते सेव्यते पदार्थेन प्रसिद्धतया उत्प्रेक्ष्यते इति भक्तिर्धर्मोऽभिधेयेन सामीप्यादिः। तत आगतो भाक्तः लाक्षणिकोऽर्थः। यदाह—"अभिधेयेन सामीप्यात् सारूप्यात् समवायतः। वैपरीत्यात् क्रियायोगात् लक्षणा पञ्चधा मता॥" इति। (२) गुणसमुदायवृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिर्भक्तिः। तत आगतो गौणोऽर्थो भाक्तः॥ भक्तिः प्रतिपाद्ये सामीप्य-तैक्ष्ण्यादौ श्रद्धातिशयः। तां प्रयोजनत्वेन उद्दिश्य आगतो भाक्तः इति गौणो लाक्षणिकश्च॥ मुख्यस्य चार्थस्य भङ्गो भक्तिः॥ इत्येवं मुख्यार्थबाधा निमित्तं प्रयोजनमिति त्रयसद्भाव उपचारबीजमिति उक्तं भवति॥—*Op. cit.*, pp. 29-30.[1] अन्ये—refers to

---

[1] It is to be noted that Kumārila in his *Tantravārttika* on Śabara's *Bhāṣya* on *JS*. I. 4 23, distinguishes between लक्षणा and गौणी as two separate functions. We quote here the passage, though somewhat long, for easy reference : "....अत्र तु सर्वगौणवृत्तीनां लक्षणमुच्यते। ननु च सहचरण-स्थानादीनि अन्यान्यपि अक्षपादप्रभृतिभिः (*Vide* Gautama's *Nyāya-Sūtra*) गौणनिमित्तानि उक्तानि। लोके च दृश्यते--यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति, अश्वसहस्रेणामुको राजा जित इति। तान्युपसंहर्त्तव्यानि। लिङ्गसमवायेनैवोपसंहृतानीति केचित्। छत्त्रिसमवेतेतरप्रत्ययवद्धि यष्टिसहचरितादिप्रत्ययो भवति। अथवा गौण्या वृत्तेरिह निमित्तमभिधीयते, न लक्षणायाः। किंचानयोर्भेदोऽप्यस्ति। बाढमस्ति। कुतः ?--"अभिधेयाविनाभूतेप्रतीतिर्लक्षणेष्यते। लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता॥" तत्र यथैवाकृतिवचनः शब्दस्तत्सहचरितां व्यक्तिं लक्षयति तथैव यष्टिमञ्चाश्वादयः तत्-संबद्धपुरुषलक्षणार्था भवन्ति। 'अग्निर्माणवक' इति तु नाग्नित्वाविनाभावेन माणवकः प्रतीयते। किं तर्हि--वह्नित्वलक्षितादर्थाद् यत् पैङ्गल्यादि गम्यते। तेन माणवके बुद्धिः सादृश्यादुप-

Udbhaṭa, Vāmana, etc. Udbhaṭa, in his gloss on Bhāmaha's काव्यालंकार—called भामह-विवरण, a work no longer extant—recognized लक्षणा as a separate function. Cf. भामहेनोक्तम्-"शब्दाश्छन्दोऽभिधानार्थाः" (काव्यालं 1. 9) इति। अभिधानस्य शब्दाद् भेदं व्याख्यातुं भट्टोद्भटो वभाषे—"शब्दानामभिधानम् अभिधाव्यापारो मुख्यो गुणवृत्तिश्च" इति। वामनोऽपि "सादृश्याल्लक्षणा वक्रोक्ति"रिति।—°*Locana*, p. 32. Thus, these authors

---

जायते॥' सर्वत्र च तत्सिद्धिकरादौ इयमेव प्रस्तरप्रभृतौ यजमानादिशब्दानां वृत्तिरिति त उदाहृताः॥—*Op. cit.*, Vol. I, p. 354. (Ānandās'rama Sanskrit Series Edn.). Comp. "तत्सिद्धि-जातिसारूप्य-प्रशंसा-लिङ्ग-भूमभिः। षड्भिः सवत्र शब्दानां गौणी वृत्तिर्व्यवस्थिता॥"—Cited in the *Jaiminīya-Nyāyamālā-vistara* of Mādhavācārya. Mammaṭa, in his *Kāvyaprakās'a*, Chap. II, cites Kumārila's definition of लक्षणा. But he seems to have an erroneous idea as to the interpretation of the *kārikā*, for he cites it in support of the view that लक्षणा and गौणी are but variants of the self-same function, which, as will be seen from the extract from the *Tantravārttika*, is just the reverse of what Kumārila held. His commentators, too, failed to notice this incongruency and had obviously no idea of the context in which the *kārikā* was originally read. For example, Caṇḍīdāsa observes: उक्तं चान्यत्रेति। लक्षणातो भिन्ना गौणीति ये मन्यन्ते तन्मतं रिक्ततरमिति सूचनपरम्।—p. 50 (*Saraswatī Bhavana Texts*. Ed. by Prof. Sivaprasad Bhattacharya, M.A.). The reason why Kumārila considered गौणी to be different from लक्षणा seems to have been this, that while सामीप्य, विरोध, समवाय, etc., are all primary relations (साक्षात्संबन्ध), सादृश्य or similarity, according to the Bhāṭṭas, is merely a derivative one (परम्परासंबन्ध)—viz. तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम्—and as such in गौर्वाहीकः, etc., the secondary sense is indirectly conveyed. For example,

had made a distinct and appreciable advance upon the so-called Negativists who recognized only अभिधा as the sole function of words and वाच्यार्थ as the only possible sense,

---

the term गौः, first of all, conveys by अभिधा or *denotation* गोत्व, as according to Mīmāṁsakas all terms have a universal connotation (cf. "संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा"), which by *Indication* (लक्षणा) conveys the idea of जडत्व and मान्द्य, which on their part again convey, by a second लक्षणा, their substratum or आधार—the वाहीक. Thus, in fact, गौणी is idential with लक्षितलक्षणा as in द्विरेफ. Compare : "लक्षितलक्षणा हि गौणी"—*Nayanaprasādinī* on चित्सुखी, p. 152 (NSP. Edn.) Caṇḍidāsa, with apparent good reason, endeavours to show that the distinction between लक्षणा and गौणी is more technical and scholastic than real. We quote here the following extracts from his commentary on the *Kāvyaprakās'a :* ननु गौर्वाहीक इत्यादावपि वाहीकादेर्गोतादात्म्यादिरेव अविवेकित्वाद्यतिशयप्रतीतिफलोपासनीया, गवादिभेदराहित्यमात्रप्रतीतौ हि गोगतधर्मादिसदृशधर्माधिकरणत्वमात्रप्रतीतिफलायां "गोसदृशो वाहीक" इत्यादिप्रयोगनिर्विशेषत्वम् । न च तद्भेदप्रत्ययस्थगनादेव तद्धर्मातिशयप्रत्यय इति न्याय्यम् । न चैवंविध-युक्तिप्रसरनिषेधे प्रकृतेऽपि जागर्त्ति अज्ञाडिण्डिमाराव: (?) । तस्मात् अलीक एव एतावान् उपचारकैतवविवेचनाय प्रयास इति चेत् । सत्यम् एतत् । किन्तु प्राचीनप्रणयमनुरुन्धानेन ग्रन्थकृता इत्थमभिहितम् । वस्तुतस्तु सम्बन्धस्वरूपभेदमाश्रित्य कथञ्चित् निर्वाह्यो गौणशुद्धविभाग इति । एतच्च संबन्धभेदमात्रात् वृत्तिभेदाङ्गीकारोऽतिप्रसञ्जक इति मत्वा लक्षणायामेव गौणीमन्तर्भाव्य परिगणयता सूक्ष्मदृशाऽसूत्रितमेव मन्तव्यम् । सर्वथैवाभेदाध्यासश्च प्रयोजनमिति च साध्यवसानगौणे वक्ष्यति । यद्वा सम्बन्धान्तरं लक्ष्यलक्षकयोः साक्षात् दत्तपदं भवति, सादृश्यं तु गोवाहीकादेर्धर्मसाजात्यरूपं न तथा इति गौणशुद्धव्यपदेशः ।।—*Op. cit.* pp. 48-49. Also : जातिमात्रमभिधाविषय इति नये लक्ष्यमाणस्याक्षिप्यमाणस्वलक्षणस्य ये गुणाः, यद्वा लक्ष्यमाणा मुख्यार्थविशेषतया प्रतीयमाना ये गुणास्तद्योजनात् सजातीयगुणवत्त्वलक्षणात् सादृश्यात् उज्जीविताया वृत्तेर्गौणतेति । साक्षात्सम्बन्धराहित्यात् गौणी न लक्ष्यत इत्यर्थः । नन्वेतावता च वैषम्यं नात्यन्तवैजात्यावहम । तथाहि

since in accepting Indication (लक्षणा) as an additional function they had just touched the fringe of suggestion (ध्वनि). For, लक्षणा, to be valid, must either be based on रूढि or

---

मुख्यार्थबाध-सम्बन्ध-रूढि-प्रयोजनान्यतरानुरोधस्तावत् उभयत्र समानः। साक्षादसाक्षात्त्वेन सम्बन्धमात्रवैचित्र्यं किंचिदवान्तरवैधर्म्यमाधत्ते इति लक्षणा-विशेष एव गौणी ॥—*loc. cit.* The following extract from Appaya D ksita's *Vṛttivārttika* would be found useful: तत्सादृश्येन प्रति-पादकत्वरूपा गौण्यपि लक्षणाप्रभेद एव, तत्सदृशेऽपि तन्निरूपित-सादृश्याधि-करणत्व-परम्परासंबन्धसत्त्वात्। नहि साक्षात्संबन्धे विशिष्टबुद्धियोग्यसंबन्धे वा सत्येव लक्षणेति नियमः। चक्षुरादेर्घटनैल्यादिषु संयुक्तसमवायादिवद् विशिष्टबुद्धययोग्यस्य परम्परासंबन्धस्यापि प्रत्यासत्तित्वोपपत्तेः। व्यतिरेक-लक्षणास्थले तन्निरूपित-विरोधाधिकरणत्वादिपरम्परासंबन्धमात्रेण तादृशेन लक्षणाक्लृप्तेश्च। एतेन—"सादृश्यं न संबन्धः" इति गौणी लक्षणातो भिन्ना, विशिष्टधीयोग्यस्यैव संबन्धत्वात्। संयोगे सति "दण्डी देवदत्त" इतिवत् सादृश्ये "सिंहवान् देवदत्त" इति विशिष्टबुद्धेरदर्शनात्—इति निरस्तम्। विशिष्टबुद्धयनियामकपरंपरासंबन्धमात्रस्य प्रत्यासत्तित्वोपपत्तेस्तावता लक्षणा-क्लृप्तेश्च दर्शितत्वात्। तस्मात् सादृश्यगर्भ-तदन्यसंबन्धनिमित्ततया गौणी शुद्धा चेति लक्षणाया एव द्वैविध्यम् ॥—*Op. cit.*, p. 1› (NSP. Edn.). Madhus dana Sarasvatī, however, in his वेदान्तकल्पलतिका, supports the Mimāṁsaka view differentiating गौणी from लक्षणा. We cite below his illuminating observations: शक्यवृत्तिलक्ष्यमाण-गुणसंबन्धो गौणी। यथा 'सिंहो माणवक' इत्यत्र सिंहपदस्य सिंहवृत्तिशौर्यादिगुण-लक्षणस्य तद्वति माणवके वृत्तिरिति। अत एव लक्षणा गौणीतो बलवती, गौण्या वृत्तिद्वयात्मकत्वात्। तदुक्तम्—"अभिधेयाविनाभूते"ति।.... गौण्यास्तु वृत्तिद्वयात्मकत्वात् न लक्षणायामन्तर्भावः। न च सादृश्यसंबन्धेन सिंहपदस्य माणवके वृत्तिर्लक्षणैवेति साम्प्रतम्, सादृश्यस्य शाब्दबोधे भानाभावप्रसङ्गात्, शक्यसंबन्धस्य स्वोपस्थापकत्वाभावात्, संबन्धिभानार्थ-मेव तस्य वृत्तित्वाभ्युपगमात्। तस्मात् लक्षणावैलक्षण्यात् अतिरिक्तैव वृत्तिर्गौणीति चतुरस्रम्।....व्यञ्जनाख्याऽपरा वृत्तिरित्यालंकारिकाः। ते तु गौणीं लक्षणामध्येऽन्तर्भाव्य मुख्या लक्षणा व्यञ्जना चेति त्रैविध्यमाचक्षते ॥-....—*Op. cit.*, pp. 39-41. (*Saraswati Bhavana Texts*, Benares.)

have some प्रयोजन. And in a प्रयोजनमूला लक्षणा, the प्रयोजन must always be conveyed by suggestion.[1] Though Udbhaṭa, Vāmana and others had no idea of the existence of suggestion in a case of लक्षणा, still by recognizing लक्षणा, based on प्रयोजन (which they thought to fall within the purview of the self-same function), they advanced a step further towards the recognition of व्यञ्जना as a separate function and व्यङ्ग्यार्थ as different from वाच्यार्थ. यद्यपि...... प्रकाशित:—It might be argued that though Udbhaṭa, Vāmana, etc., recognized लक्षणा as an additional function, still it is erroneous to hold that they equated it with ध्वनि or व्यञ्जना, for no such term as ध्वनि or व्यञ्जना is to be met with in their works. So it is misrepresenting them to state—"काव्यात्मानं गुणवृत्तिरित्याहुः". To this the Dhvanikāra answers, that all this is true. But as they recognized only two functions—viz. अभिधा and लक्षणा, and as अभिधा conveyed only the primary sense (मुख्यार्थ), it is an *a priori* conclusion that all other senses should be conveyed by लक्षणा, and as व्यङ्ग्यार्थ too is different from the primary sense, it, too, must be subsumed under the लक्ष्य sense. Thus according to these authors लक्ष्य and व्यङ्ग्य senses stand on the same footing, and it is from this standpoint that Ānandavardhana represents them as having equated भक्ति with ध्वनि. Compare °*Locana* : गुणाः सामीप्यादयो धर्मास्तैक्ष्ण्यादयश्च । तैरुपायैर्वृत्तिरर्थान्तरे यस्य, तैरुपायैर्वृत्तिर्वा शब्दस्य यत्र स गुणवृत्तिः शब्दोऽर्थो वा। गुणद्वारेण वा वर्त्तनं गुणवृत्तिरमुख्योऽभिधाव्यापारः । एतदुक्तं

[1] Compare : व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।—*Kāvyaprakāśa*, II. Also : यस्य प्रतीतिमाधातुं व्यञ्जना समुपास्यते । फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥—*Ibid.* For a refutation of the view that प्रयोजन too is canveyed by लक्षणा, see *infra.*

भवति—ध्वनतीति वा, ध्यन्यत इति वा, ध्वननमिति वा यदि ध्वनिः, तथाऽपि उपचरितशब्दार्थव्यापारातिरिक्तो नासौ कश्चित् । मुख्यार्थे हि अभिधैव इति पारिशेष्यात् अमुख्य एव ध्वनिः, तृतीयराश्यभावात् ॥ —P. 31.[1] Thus according to upholders of the भक्तिवाद, व्यञ्जकशब्द=लाक्षणिकशब्द ; व्यङ्ग्यार्थ=लक्ष्यार्थ ; and व्यञ्जनाव्यापार=लक्षणाव्यापार.

TEXT

§ ७ । केचित् पुनर्लक्षण-करण-शालीन-बुद्धयो ध्वनेस्तत्त्वं गिरामगोचरं सहृदय-हृदय-संवेद्यमेव समाख्यातवन्तः । तेनैवं-विधासु विमतिषु स्थितासु सहृदयमनःप्रीतये तत्स्वरूपं ब्रूमः ॥

EXPOSITION

§ 7. Anandvardhana here puts forth the view of the अनिर्वचनीयवादिन्'s. Shy as they are in formulating any accurate definition, they posit that the true essence of Suggestion is inexplicable and can be ill defined by words, and it can only be relished by the connoisseurs of poetic art only through personal experience. शालीन-बुद्धयः=अप्रगल्भ-मतयः="of bashful intellect" For the derivation of the form शालीन, note Pāṇini's Sutra : 'शालीन-कौपीने अधृष्टाकार्ययोः' (V. 2. 20). Abhinavagupta sums up admirably the relative

---

[1] *Vide :* लक्षणामार्गावगाहित्वं तु ध्वनेः सहृदयैर्नूतनतयोपवर्णितस्य विद्यत इति दिशमुन्मीलयितुमिदमत्रोक्तम् । एतच्च विद्वद्भिः कुशाग्रीयया बुद्धया निरूपणीयम् । न तु झगित्येवासूयितव्यम् इत्यलमतिप्रसंगेन ॥—Mukulabhaṭṭa's अभिधावृत्तिमातृका, p. 21 (NSP. Edn.). Mukulabhaṭṭa was the teacher of Pratihārendurāja, the preceptor of Abhinavagupta himself.

position of these three opponents of Dhvani theory in the following extract :—

"एते च त्रय उत्तरोत्तरं भव्यबुद्धयः। प्राच्या हि विपर्यस्ता एव सर्वथा। मध्यमास्तु तद्रूपं जानाना अपि सन्देहेनापह्नुवते। अन्त्यास्तु अनपह्नुवाना अपि लक्षयितुं न जानते—इति क्रमेण विपर्यास-सन्देहाज्ञान-प्राधान्यमेतेषाम्"—°*Locana*. pp. 33–34.

तेनैवंविधासु विमतिषु स्थितासु. . . .ब्रूमः—'As there are so many divergent views regarding the nature of Suggestion, we are going to expound the theory for the delectation of the connoisseurs.' विमतिः=विरुद्धा मतिः=विप्रतिपत्तिः=संशयः= doubt based upon a conflict of views. Every logical discussion, according to the Naiyāyika, must be preceded by an account of the different views of the various contending parties, which give rise to doubt (संशय) as to the true nature of the thing to be discussed, and as such संशय, according to them, is the *conditio sine qua non* in all sorts of serious disquisition. Compare : 'यत्र संशय-स्तत्रैवमुत्तरोत्तरप्रसङ्गः'—*Nyāya-Sūtra*, II. 1. 7 : 'यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा, तत्र तत्रैवं संशये परेण प्रतिषिद्धे समाधि-र्वाच्य इति। अतः सर्व-परीक्षा-व्यापित्वात् प्रथमं संशयः परीक्षित इति।'—*Vātsyāyana-Bhāṣya* thereon. Note also Abhinavagupta's °*Locana* : 'तेनेति—एकैकोऽप्ययं विप्रतिपत्तिरूपो वाक्यार्थो निरूपणे हेतुत्वं प्रतिपद्यते'—p. 34. The view of the अनिर्वचनीयवादिन्'s seems to to very beautifully expressed in the following verse attributed to Vijjakā : 'कवेरभिप्रायमशब्दगोचरं स्फुरन्तमार्द्रेषु पदेषु केवलम्। वदद्भिरङ्गैः स्फुटरोमविक्रियैर्जनस्य तूष्णीम्भवतोऽयमञ्जलिः॥'

TEXT

§ ८। तस्य हि ध्वनेः स्वरूपं सकल-सत्कवि-काव्योपनिषद्भूतम् अतिरमणीयम् अणीयसोभिरपि चिरन्तन-काव्य-लक्षण-विधायिनां बुद्धिभिरनुन्मीलितपूर्वम् अथ च रामायण-महाभारत-प्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठाम् इति प्रकाश्यते ॥

EXPOSITION

§ 8. तस्य हि....लभतां प्रतिष्ठाम्—Construe the sentence as तस्य हि ध्वनेः स्वरूपं लक्षयतां सहृदयानां मनसि आनन्दः प्रतिष्ठां लभताम्, the expressions सकलसत्कविकाव्योपनिषद्भूतम्, अतिरमणीयम्, अणीयसीभिरपि....अनुन्मीलितपूर्वम्, रामायण.. ..प्रसिद्धव्यवहारम्, being all qualifying adjuncts of ध्वनेः स्वरूपम्. "The essence of Dhvani is being expounded for the pleasure of the connoisseurs who are ever intent upon seeing it defined." सकल....भूतम्—the secret of all true poetic creations.

Abhinavagupta brings out the significance of the qualifying clauses, which, in his opinion, are directed towards the confutation of the five rival theories recorded above. Compare :—

"तत्स्वरूपशब्दं व्याचक्षाणः संक्षेपेण तावत् पूर्वोदीरित विकल्प-पञ्चकोद्धरणं सूचयति—सकलेत्यादिना। सकलशब्देन च 'प्रकार-लेशे कस्मिंश्चित्' इति निराकरोति। अतिरमणीयम्-इति भाक्ताद् व्यतिरेकमाह। नहि 'सिंहो वटुः' 'गङ्गायां घोषः' इत्यत्र रम्यता काचित्। उपनिषद्भूत-शब्देन तु 'अपूर्वसमाख्यामात्रकरणे' इत्यादि निराकृतम्। अणीयसीभिरित्यादिना गुणालंकारानन्तर्भूतत्वं सूचयति। 'अथ च'—इत्यादिना 'तत्समयान्तःपातिनः' इत्यादिना

यत् सामयिकत्वं शङ्कितं तन्निरवकाशीकरोति । रामायण-महाभारत-शब्देन आदिकवेः प्रभृति सर्वैरेव सूरिभिरस्यादरः कृत इति दर्शयति । लक्षयताम्—इत्यनेन 'वाचां स्थितमविषये' इति परास्यति । लक्ष्यतेऽनेनेति लक्षो लक्षणम् । लक्षेण निरूपयन्ति लक्षयन्ति । तेषां लक्षण-द्वारेण निरूपयताम् इत्यर्थः ।'—°*Locana*, pp. 37-38.

आनन्दः—There is a pun on this word. It means, on the one hand, the aesthetic delight consequent upon the perusal of the best kind of poetic creation. Though there are other ends that can be attained from a study of poetry, viz. the attainment of the four ends of human life (धर्म, अर्थ, काम and मोक्ष), still none can compare with the experience of the beatific delight. Compare : "चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्। काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ।"—*Vakroktijīvita*. I 5. From the point of view of the poet also it is the delight in his creation which amply repays his labours and surpasses in value the munificent gift of his royal patron.[1] Cf :—"यशःप्रभृत्येव फलं नास्य केवलमिष्यते । निर्माण-काले श्रीकृष्ण-गुण-लावण्य-केलिषु ।। चित्तस्याभिनिवेशेन सान्द्रानन्द-लयस्तु यः । स एव परमो लाभः स्वादकानां तथैव सः ।।"—Kavi-karṇapūra's अलंकारकौस्तुभ Kiraṇa I. p. 7 (Varendra Research Society Edn.). As °*Locana* puts it : 'आनन्द इति । रसचवर्णा-त्मनः प्राधान्यं दर्शयन् रसध्वनेरेव सर्वत्र मुख्यभूतमात्मत्वमिति दर्शयति । तत्र कवेस्तावत् कीर्त्यापि प्रीतिरेव संपाद्या । यदाह—'कीर्त्तिं स्वर्गफलामाहुः'—इत्यादि । श्रोतॄणां च व्युत्पत्ति-प्रीती यद्यपि स्तः, यथोक्तम्—'धर्मार्थ-काम-मोक्षेषु वैचक्षण्यं कलासु च । करोति

[1] Compare : 'हेम्नो भारशतानि वा मदमुचां वृन्दानि वा दन्तिनां श्रीहर्षेण समर्पितानि कवये बाणाय कुत्राद्य तत् ।'

कीर्त्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥'—इति । तथापि तत्र प्रीति-रेव प्रधानम् । अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्य-श्चेतिहासादिभ्यो व्युत्पत्तिहेतुभ्यः कोऽस्य काव्यरूपस्य व्युत्पत्तिहेतो-र्जायासम्मितत्वलक्षणो विशेष इति प्रधान्येन आनन्द एवोक्तः। चतुर्वर्ग-व्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यं फलम् ॥'—

Secondly, there is also a covert reference in the word आनन्द to the name of the author of the present treatise—viz. Ānandavardhana. *Vide* the maxim : नामैकदेशग्रहणे नामग्रहणम्. As Abhinavagupta shrewdly observes : "आनन्द इति च ग्रन्थकृतो नाम । तेन स आनन्दवर्धनाचार्य एतच्छास्त्रद्वारेण सहृदयहृदयेष प्रतिष्ठां देवतायतनादिवदनश्वरीं स्थितिं गच्छतु इति भावः। यथोक्तम्—

'उपेयुषामपि दिवं सन्निबन्ध-विधायिनाम् ।
आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः ॥' इति ।

यथा मनसि प्रतिष्ठा एवंविधमस्य मनः। सहृदयचक्रवर्त्ती खल्वयं ग्रन्थकृत् इति यावत् । यथा 'युद्धे प्रतिष्ठा परमार्जुनस्य' इति । स्वनामप्रकटीकरणं श्रोतॄणां प्रवृत्त्यङ्गमेव सम्भावनाप्रत्ययो पादन-मुखेनेति ग्रन्थान्ते वक्ष्यामः।[1] एवं ग्रन्थकृतः कवेः श्रोतुश्च मुख्यं प्रयोजनमुक्तम् ॥"

---

[1] As he states in his comments on the concluding verse of the *Dhvanyāloka*—'तद्व्याकरोदिति । इह बाहुल्येन लोको लोक-प्रसिद्ध्या सम्भावनाप्रत्ययबलेन प्रवर्त्तते । स च संभावनाप्रत्ययो नाम-श्रवणवशात् प्रसिद्धान्यतदीय-समाचार-कवित्व-विद्वत्त्वादिसमनुसरणेन भवति । तथाहि-'भर्तृहरिणा इदं कृतम् यस्यायमौदार्यमहिमा, यस्यास्मिञ्छास्त्रे एवंविधः सारो दृश्यते तस्यायं श्लोक-प्रबन्धस्तस्मादरणीयमेतदिति' लोकः प्रवर्त्तमानो दृश्यते । लोकश्चायं प्रवर्त्तनीयः तच्छास्त्रोदितप्रयोजनसम्पत्तये । तदनुग्राह्यश्रोतृजनप्रवर्त्तनाङ्गत्वाद् ग्रन्थकाराः स्वनामनिबन्धनं कुर्वन्ति ।"—*Locana* on *Dhvanyāloka*, IV. Concluding verse.

TEXT

§९। तत्र ध्वनेरेव लक्षयितुमारब्धस्य भूमिकां रचयितुमिदमुच्यते—

योऽर्थः सहृदय-श्लाघ्यः काव्यात्मेति व्यवस्थितः ।
वाच्य-प्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ।।२।।

काव्यस्य हि ललितोचितसंनिवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदय-श्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ ।।

EXPOSITION

§9. 'तत्र....इदमुच्यते'—The present *Kārikā*, says the Vṛttikāra, forms a prelude, as it were, to the theory of suggestion, which is going to be defined. भूमिका-भूमिरिव भूमिका—'like the foundation of a building'. इवार्थे कन्. Without knowing the nature of वाच्यार्थ, it is not possible to grasp the essence of व्यङ्ग्यार्थ which comes in the wake of the former. As Abhinavagupta explains :—"यथा अपूर्व-निर्माणे चिकीर्षिते पूर्वं भूमिर्विरच्यते, तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमिः । तत्पृष्ठेऽधिकप्रतीयमानांशोल्लिङ्गनात् । वाच्येन समशीर्षिकया गणनं तु तस्यापि अनपह्नवनीयत्वं प्रतिपादयितुम् ।"—*Op. cit.* pp. 42-43.

"योऽर्थः....स्मृतौ" (*Kārikā*)—Now, it might be argued that the Dhvanikāra, here, is inconsistent. For in the opening verse he has stated that "the suggested sense is the soul of poetry" (काव्यस्यात्मा ध्वनिरिति), but in the present *Kārikā* he says, "the sense which causes the delight of the सहृदय and is termed the soul of poetry has two divisions, viz. वाच्य

and प्रतीयमान," thus placing वाच्य and प्रतीयमान on the same footing. This objection has been raised by Viśvanātha in his *Sāhityadarpaṇa*, I :—

"यच्च ध्वनिकारेणोक्तम्—

'अर्थः सहृदयश्लाध्यः काव्यात्मा यो व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥'—इति।

तत्र वाच्यस्यात्मत्वं 'काव्यस्यात्मा ध्वनिः' इति स्ववचनविरोधादेवापास्तम्।"—(pp. 4-5. MM. Kane's Edn.). But all this criticism is quite uncalled for. The inconsistency, as noticed by Viśvanātha, is only apparent and not real, and if Viśvanātha had cared to glance at the following comments of Abhinavagupta, he would never have raised the question again :—

"शब्दार्थ-शरीरं तावत् काव्यम्'—इति यदुक्तम्, तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव। तत्र शब्दस्तावत् शरीरभाग एव सन्निविशते सर्वजनसंवेद्यधर्मत्वात् स्थूल-कृशादिवत्। अर्थः पुनः सकलजनसंवेद्यो न भवति। न हि अर्थमात्रेण काव्यव्यपदेशः, लौकिक-वैदिकवाक्येषु तदभावात्। तदाह—सहृदयश्लाघ्य इति। स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्या विभज्यते। तथाहि—तुल्येऽर्थरूपत्वे किमिति कस्मैचिदेव सहृदयाः श्लाघन्ते। तद भवितव्य केनचिद् विशेषेण।[1] यो विशेषः स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते। वाच्यसंवलनाविमोहितहृदयैस्तु तत्पृथग्भावे विप्रतिपद्यते, चार्वाकैरिव आत्मपृथग्भावे। अत एव 'अर्थः' इत्येकतया उपक्रम्य सहृदयश्लाघ्य इति

---

[1] The same idea is expressed in the following *āryā* from Govardhana's *Āryā-Saptas'atī* : "अध्वनि पदग्रहपरं मदयति हृदयं नवा न च श्रवणम्। काव्यमभिज्ञसभायां मञ्जीरमिव केलिवेलायाम् ॥"

विशेषणद्वारा हेतुमभिधाय अपोद्धारदृशा तस्य द्वौ भेदौ अंशौ इत्युक्तम्, नतु द्वावप्यात्मानौ काव्यस्येति ।।"—*Op. cit.* pp. 43-45.

ललितोचितसन्निवेशचारुणः—The words and senses that consttute the body of poetry should be adorned and properly selected and arranged: "ललितशब्देन गुणालंकारानुग्रहमाह । उचित-शब्देन रसविषयमेवौचित्यं भवति इति दर्शयन् रसध्वनेर्जीवितत्वं सूचयति । तदभावे हि किमपेक्षयेदमौचित्यं नाम सर्वत्र उद्धोष्यते-इति भावः ।।' —°*Locana* p. 45.

We are to note that according to Dhvani theorists Rasa (Poetic Emotion) is the Soul of Poetry and all other elements like गुण, अलंकार, रीति, औचित्य are subordinate to it. But Kṣemendra, in his treatise called *Aucitya-vicīra-carcī*, tries to controvert this thesis of the Dhvani-theorists. According to him *Aucitya* or Propriety is the soul of poetry and and all other considerations are secondary to the poets. We should note that it was Ānandavardhana, who, in course of his exposition of the Dhvani theory, first of all recognized *aucitya* as an important factor which every poet should take note of if he aspires to compose true poetry. He expressed his view in the following couplet and gave a few instances, where this element of *aucitya* was flagrantly ignored, in consequence of which the sentiment had to suffer. He said:

"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ।।"--*Dhvanyāloka*, III.

—Thus, according to his view, Sentiment or *rasa* is the principal element in a *Kāvya*, and *aucitya* is to be taken note of inasmuch as it enhances the aesthetic pleasure and as such it is quite subservient to *rasa*. If we note some of the

statements of Ānandavardhana in the Third Uddyota of his *Dhvanyāloka* it would be clear that he had never even concevied of attaching to *aucitya* a rank higher than *rasa*. For, the writers of the Dhvani school regard *rasa-dhvani* as the quintessence of every true poetic art. Compare :—

"व्यङ्ग्य-व्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि ।
रसादिमय एकस्मिन् कविः स्यादवधानवान् ॥"--

Dhvanyāloka, IV 5.

So also :—

"वाच्यानां वाचकानां च यदौचित्येन योजनम् ।
रसादिविषयेणैतत् कर्म मुख्यं महाकवेः ॥"—*Op. cit.*, III. 32

In the Fourth Uddyota the Dhvanikāra notes some of the varieties of this *aucitya* :—

"अवस्था-देश-कालादिविशेषैरपि जायते ।
आनन्त्यमेव वाच्यस्य शुद्धस्यापि स्वभावतः ॥"—*Op cit.* IV. 7

He refers to Kālidāsa's *Kumārasambhava* VII, in which the youthful dalliance of Pārvatī and Śiva is described in detail, as an instance where this element of *aucitya* has been violated. For our sense of decorum does not permit us to relish this passionate amour on the part of the two Great Deities who are looked upon by the whole of mankind as their parents (cf. जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ). As Ānandavardhana so aptly remarks : 'रतिर्हि भारतवर्षोचितेनैव व्यवहारेण दिव्यानामपि वर्णनीयेति स्थितिः।..तथाहि अधमप्रकृत्यौचित्येनोत्तमप्रकृतेः श्रृङ्गारोपनिबन्धने का भवेन्नोपहास्यता ।....

तस्मादभिनेयार्थेऽनभिनेयार्थे वा काव्ये यदुत्तमप्रकृते राजादेरुत्तमप्रकृतिभिर्नायिकाभिः सह ग्राम्यसम्भोगवर्णनं तत् पित्रोः सम्भोगवर्णनमिव सुतरामसभ्यम् । तथैवोत्तमदेवतादिविषयम्।..यत्त्वेवंविधे

विषये महाकवीनामप्यसमीक्ष्यकारिता लक्ष्ये दृश्यते स दाष एव। स तु शक्तितिरस्कृतत्वात् न लक्ष्यत इत्युक्तमेव।'—*Dhvanyāloka-Vṛtti* on *Kārikās* III, 10-14. So also: तथाहि महाकवीनामप्युत्तम-देवताविषयप्रसिद्धसंभोगशृङ्गारनिबन्धनाद्यनौचित्यं शक्तितिरस्कृतत्वात् ग्राम्यत्वेन न प्रतिभासते। यथा कुमारसम्भवे देवीसम्भोग-वर्णनम्।'—*Vṛtti* on III. 5. For, as Ānandavardhana himself states, there should be propriety with reference to विभाव, अनुभाव and सञ्चारिभाव. Cf: 'विभाव-भावानुभाव-सञ्चार्यौचित्यचारुण:' etc.—*Dhv.* III. 10-14. So it is clear from this short analysis that Ānandavardhana views *aucitya* as a subsidiary element only, that goes to embellish a poetic art, just as other elements like Alaṃkāras, Vṛttis etc.

But the Kāsmirian Kṣemendra, though he came much later in date, tried to go one step further. He wrote his treatise *Aucitya-vicāra-carcā* only to secure for *aucitya* the highest rank, higher even than that of *rasa-dhvani*. This is quite a novel thesis no doubt, but if we are to be conscientious in our judgment, we are bound to state that Kṣemendra has not been able to gain for *aucitya* much beyond what had already been accorded to it by Ānandavardhana. His work is nothing more than a running commentary on Ānandavardhana's thesis, and only an elaborate expostion of the implications contained in the latter's statements. And at places his language is so complicated and confused that it becomes quite apparent that he himself had no very clear conception of the cause for which he was fighting. For example, we may quote here his definition of *rasaucitya* :—

"कुर्वन् सर्वाशये व्याप्तिमौचित्यरुचिरो रसः।
मधुमास इवाशोकं करोत्यङ्कुरितं मनः"—

Aucityavicāra°, Kārikā 16.

—"औचित्येन भ्राजिष्णुः शृङ्गारादिलक्षणे रसः"—(*Vṛtti* thereon.). It would be quite evident from this extract that Kṣemendra, too, unconsciously perhaps, regards *rasa* as something higher than *aucitya*, which only serves to heighten the emotional effect. Here his language itself gives him the lie ! Even though Kṣemendra has not been successful in raising the status of *aucitya* to any higher level, still he has brought to light the great importance of this element, as adding to the beauty of a poetic art, and as such he deserves credit. What we are required to do is to take the statement—"औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ।"—*cum grano salis.*[1]

TEXT

§ १० । तत्र वाच्यः प्रसिद्धो यः प्रकाररुपमादिभिः ।
बहुधा व्याकृतः सोऽन्यैः
काव्यलक्ष्मविधायिभिः ।
ततो नेह प्रतन्यते ॥३॥
केवलमनूद्यते पुनर्यथोपयोगमिति ॥

EXPOSITION

§10. "Of these two main divisions of *artha*, the nature of the Vācyārtha and its adornments has been discussed in detail by ancient authors on poetics like Bhāmaha, Daṇḍin

---

[1] For a detailed study of the theory of *Aucitya* and Anandavardhana's attitude towards it, *vide* Dr. Suryakanta's "A study of Kṣemendra's *Kavikaṇṭhābharaṇa*, *Aucityavicāracarcā* and *Suvṛttatilaka* with an English Translation etc.", *Introduction.* (*The Poona Orientalist*, Vol. *XVII.* 1952. Nos. 1-4).

and others, and as such they have not been discussed at any great length in this treatise, but only been referred to according to requirements."

अनुवाद means 're-statement'. Comp. 'प्रमाणान्तरावगतस्यार्थस्य शब्देन संकीर्त्तनमात्रमनुवाद:'—*Kāśikā* on P. II. 4.3 ('अनुवादे चरणानाम्').

The author of the *Vakroktijīvita* too makes similar observations regarding वाच्य and वाचक. Cf :—

"वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।

तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ॥"—*Vakrokti* °1.8.

प्रकारैरुपमादिभिः—Of the Figures of Speech that embellish the expressed sense (वाच्यार्थ), उपमा (Simile) stands out pre-eminent. As Vāmana says : 'सम्प्रत्यर्थालंकाराणां प्रस्तावः । तन्मूलं चोपमा-इति सैव विचार्यते ।'—*Kāvyālaṁkāra-Sūtra-Vṛtti* IV. 2.1. So also : "उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान् । रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥"—Appayya Dikṣita's चित्रमीमांसा, p.2. (Nirṇayasāgara Edn.)

TEXT

§६१। प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत् प्रसिद्धावयवातिरिक्तं
विभाति लावण्यमिवाङ्गनासु ॥४॥

प्रतीयमानं पुनरन्यदेव वाच्याद्व वस्त्वस्ति वाणीषु महाकवीनाम्। यत्तत् सहृदय-सुप्रसिद्धं प्रसिद्धेभ्योऽलंकृतेभ्यः प्रतीतेभ्यो वाऽवयवेभ्यो व्यतिरिक्तत्वेन प्रकाशते लावण्यमिवाङ्गनासु। यथा ह्यङ्गनासु

लावण्यं पृथङ्निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव सहृदय-लोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थः ॥

EXPOSITION

§ 11. अन्यदेव वाच्यात्--The suggested sense is quite distinct from the expressed (i.e. primary) sense, and can in no way be equated with the latter,

Ānandavardhana, here, likens the suggested sense to the supple grace of the limbs of a beautiful maiden. Just as लावण्य or grace is distinct from the ornaments like necklace, bangles etc. on the one hand, and absence of defects like blindness etc. on the other, and is quite a *tertium quid* so also the suggested sense (प्रतीयमानार्थ or व्यङ्ग्यार्थ) of a poem cannot be subsumed under the *alaṁkāras* like उपमा, रूपक on the one hand and गुण's like माधुर्य, ओजः etc. on the other. For the definition of लावण्य, cf : "मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"

Note Abhinavagupta's comments on this point :—

"लावण्यं हि नाम अवयव-संस्थानाभिव्यङ्ग्यमवयवव्यतिरिक्तं धर्मान्तरमेव । न चावयवानामेव निर्दोषता वा भूषणयोगो वा लावण्यम् । पृथङ् निर्वर्ण्यमान-काणादि-दोष-शून्य-शरीरावयवयोगिन्यामपि अलंकृतायामपि लावण्यशून्येयमिति । अतथाभूतायामपि कस्यांञ्चित् लावण्यामृतचन्द्रिकेयमिति सहृदयानां व्यवहारात् ॥"—*Op. cit.*, pp. 49-50.

The present *Kārikā* has been cited by Kuntaka in his *Vakroktijīvita*, Chapter I. We quote here the relevant extract from that treatise :—

"ननु च कैश्चित् प्रतीयमानं वस्तु ललना-लावण्य-साम्यात् लावण्यमित्युत्पादित-प्रतीति (?)—

'प्रतीयमानं पुनरन्यदेव—' इति। तत् कथं बन्ध-सौन्दर्यमात्रं लावण्यमित्यभिधीयते ? नैष दोषः। यस्मादनेन दृष्टान्तेन वाच्य-वाचक-लक्षण-प्रसिद्धावयव-व्यतिरिक्तत्वेनास्तित्वमात्रं साध्यते प्रतीयमानस्य। न पुनः सकल-लोक-लोचन-संवेद्यस्य ललना-लावण्यस्य सहृदय-हृदयानामेव संवेद्यं सत् प्रतीयमानं समीकर्त्तुं पार्यते। तस्य बन्ध-सौन्दर्यमेव अव्युत्पन्न-पद-पदार्थानामपि श्रवणमात्रेणैव हृदयहारित्व-स्पर्धया व्यपदिश्यते। प्रतीयमानं पुनः काव्य-परमार्थज्ञानामेवानु-भवगोचरतां प्रतिपद्यते, यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति। लावण्यं पुनस्तासामेव सत्कवि-गिरामिव सौन्दर्यं सकल-लोक-गोचरतामयातीत्युक्तमेवेत्यलमति-प्रसङ्गेन ॥"—*Op. cit.*, p. 56.

TEXT

§१२। स ह्यर्थो वाच्य-सामर्थ्याक्षिप्तं वस्तुमात्रमलंकारा रसा-दयश्चेत्यनेक-प्रभेद-प्रभिन्नो दर्शयिष्यते। सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्॥

EXPOSITION

§ 12. The suggested sense, again, falls into three distinct categories—viz. *vastu*, *alaṁkāra* and *rasa*, which have their own sub-varieties. And in all these cases, the suggested sense, be it *vastu* or *alaṁkāra* or *rasa*, is quite different from the expressed sense.

सर्वेषु....अन्यत्वम्—The sense which is conveyed by the function of *abhidhā* or denotation is called वाच्यार्थ, but the व्यङ्ग्यार्थ like शत्य-पावनत्वादि (in गङ्गायां घोषः) can never be communicated by denotation, because there is no संकेत. Compare : 'नाभिधा समयाभावात्'—*Kāvya-Prakśa*, II. Though *vastu*, *alaṁkāra* and *rasa*, can all be coneyed by suggestion, there is this much difference that while the first *two* can be

conveyed through Denotation as well, the last *one* is always and invariably *suggested* and never *expressed*. As Abhinavagupta puts it :—

"तत्र प्रतीयमानस्य तावद् द्वौ भेदौ—लौकिकः, काव्यव्यापारैक-गोचरश्चेति। लौकिको यः स्वशब्दवाच्यतां कदाचिदधिशेते। स च विधि-निषेधाद्यनेकप्रकारो वस्तु-शब्देनोच्यते। सोऽपि द्विविधः—यः पूर्वं क्वापि वाक्यार्थेऽलंकारभावमुपमादिरूपतयाऽन्वभूत्, इदानीं त्वनलंकाररूप एव, अन्यत्र गुणीभावाभावात् स पूर्वप्रत्यभिज्ञानबलादलंकार-ध्वनिरिति व्यपदिश्यते ब्राह्मण-श्रमण-न्यायेन।[1] तद्रूपता-भावेन तूप-लक्षितं वस्तुमात्रमुच्यते। मात्रग्रहणेन हि रूपान्तरं निराकृतम्। यस्तु स्वप्नेऽपि न स्व-शब्द-वाच्यो न लौकिक-व्यवहारपतितः, किन्तु शब्द-समर्प्यमाण-हृदय-संवाद-सुन्दर-विभावानुभाव-समुचित-प्राग्विनिविष्ट-रत्यादि-वासनानुराग-सुकुमार-स्वसंविदानन्दचर्वणा-व्यापार-रसनीयरूपो रसः, स काव्यव्यापारैक-गोचरो रसध्वनिरिति, स च ध्वनिरेवेति, स एव मुख्यतयाऽऽत्मेति॥"—*Op. cit.*, pp. 50-52.

Now, it may be asked that if *vastu* and *alaṁkāra* can as well be conveyed through Denotation (*abhidhā*), what is the use of proceeding along a tortuous way and resorting to Sugges-tion (व्यञ्जना)?[2] To this the Dhvani theorists would assert

---

1. "The maxim of *the Brāhmaṇa-ascetic*. The श्रमण is a Buddhist ascetic, and therefore not a Brahman,—but the expression ब्राह्मणश्रमण implies that though now a Buddhist he was formerly a Brahman. The maxim is used by the authors of the *Kāvyaprakāśa* and the *Sāhityadarpaṇa* in exactly the same connexion."—*Laukika-nyāyāñjali*, Part I., pp. 38-39. (Collected by Colonel G. A. Jacob. NSP.)

2. Compare the saying—"अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।"

that an idea conveyed through suggestion is more charming than the one expressed through Denotation as is attested by the unanimous verdict of all true connoisseurs of art. As Ānandavardhana states :—

"वाच्योऽर्थो न तथा स्वदते प्रतीयमानः स एव यथा"

—*Dhvanyāloka*

Mahimabhaṭṭa also notes :—

"यतः सर्वेष्वलंकारेषपमा जीवितायते ।

सा च प्रतीयमानैव तद्विदां स्वदतेतराम् ॥"

—*Vyaktiviveka*, p. 343.

(Chowkhambā Edition). Govinda Ṭhakkura, in his commentary on Mammaṭa's *Kāvyaprakās'a*, Chap. V, expressess the same idea :—

[तदुक्तं ध्वनिकृता—

'व्यज्यन्ते वस्तु-मात्रेण यदाऽलंकृतयस्तदा ।

ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ॥' इति ।

अत्र ध्वन्यङ्गता व्यङ्ग्यतया। ध्रुवं ध्वनिनैव ता व्यज्यन्ते। तद्व्यञ्जकस्य ध्वनित्वमेव । कुतः ? काव्यवृत्तेस्तदाश्रयात् । काव्यवृत्तेस्तदभिसंधानपूर्वकत्वात् । वस्तुमात्रापेक्षयाऽलंकारस्य चारुता-नियमादित्यर्थः ।] ननु यद्यलंकारापेक्षया वस्तुमात्रस्य नातिशय-नियमस्तदा कथमलंकारेण वस्तुमात्र-व्यञ्जने ध्वनित्वम्—इति चेत् । उच्यते—स एवार्थो वाच्यः सन् न तथाचमत्करोति यथा व्यङ्ग्यतापन्न इत्यनुभवसिद्धम् । अतो वाच्यताऽपकर्षहेतुः, व्यङ्ग्यता तूत्कर्षाय इति स्थितम् । यत्र चालंकारेण वस्तुमात्रं व्यङ्ग्यं तत्र अलंकारस्य वाच्यत्वेन किंचिदपकर्षात् वस्तुमात्रस्य च व्यङ्ग्यत्वेन किंचिदुत्कर्षात् युज्यत एव ध्वनित्वम् । यत्र तु वस्तुनाऽलंकारो व्यज्यते, तत्र वस्त्वलंकारयोर्वाच्यत्व-व्यङ्ग्यत्वाभ्याम् अतिशयेनैव उत्कर्षापकर्षौ इति कुतो गुणीभूत-व्यङ्ग्यत्वावकाशः ॥"—*Kāvyapradīpa*, p. 145 (N.S.P. Edn.).

TEXT

§१३। तथा हि—आद्यस्तावत् प्रभेदो वाच्याद्द् दूरं विभेदवान्। स हि कदाचिद्द् वाच्ये विधिरूपे प्रतिषेधरूपः। यथा—

'भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण।
गोलाणइ-कच्छ-कुडङ्ग-वासिणा दरिअसीहेण ॥'

EXPOSITION

§13. Ānandavardhana now proceeds to show that the first variety of the suggested sense—viz. *vastu*, differs *toto caelo* from the expressed sense. For example, when the expressed sense is injunctive in force, the suggested sense is prohibitive in character, and no sane man would ever think of identifying injunction with prohibition, or affirmation with negation. As Abhinavagupta explains: 'दूरं विभेदवान् इति। विधि-निषेधौ विरुद्धौ इति न कस्यचिद् विमतिः।'—*Op. cit.*, p. 53. The Prākṛta verse quoted here is Hāla's *Gāhā-Sattasaī*, II. 75. (NSP. Edn.). Here a courtesan addresses a virtuous ascetic who is in the habit of daily plucking flowers from the grove situated on the bank of the river Godāvarī—the *rendezvous* of the harlot and her paramour—and informs him, nervous even at the presence of a dog, of the advent of a lion in the locality, thus covertly hinting that his wanderings are not safe henceforth. Abhinavagupta thus puts forth the motif of the harlot :—

'कस्याश्चित् सकेतस्थानं जीवित-सर्वस्वायमानं धार्मिकसञ्चरणान्तरायदोषात् तदवलुप्यमान-पल्लव-कुसुमादि-विच्छायीकरणाच्च परित्रातुमियमुक्तिः।'

Mahimabhaṭṭa, who does not regard suggestion as a separate function and strives to prove it as another name for Inference (*anumāna*), thus explains the *gāthā* bringing out the inferential character of the prohibition (निषेध) conveyed here :—

"तत्र वस्तुमात्रस्य तावत् 'भम धम्मिअ—' इत्यत्र केनचित् सुकृतिना यूना सह विस्रम्भ-सम्भोग-सुखास्वादलालसया विजने वने विविध-कुसुमामोद-मुदित-मधुकृति कृतसङ्केतया कयाचित् कुसुमापचिचीषया भ्रमतो धार्मिकस्य मनोरथ-परिपन्थि तद्-देशासादनं विघ्नमिव मन्यमानया जानानयाऽपि केसरि-किशोरकस्य क्रौर्यातिरेकं कुक्कुर-मारण-मात्र-त्रासोपन्यासेन अस्य प्रियमावेदयितुकामया विदग्धयाऽपि मुग्धयेव विधिमुखेन भ्रमणस्य प्रतिषेधो विहितः ।

"अत्र हि द्वावर्थौ वाच्य-प्रतीयमानौ विधि-निषेधात्मकौ क्रमेण प्रतीति-पथमवतरतः । तयोर्धूमाग्न्योरिव साध्य-साधन-भावेनावस्थानात् ।

"तत्राद्यस्तावत् अविवेक-सिद्धः स्पष्ट एव, भ्रमण-विधि-लक्षणस्य साध्यस्य तत्परिपन्थि-क्रूर-कुक्कुर-मारणात्मनः साधनस्य चोभयोरप्युपादानात् ।

"द्वितीयस्तु अत एव हेतोः पर्यालोचित-णिजर्थस्य विवेकिनः प्रतिपत्तुः प्रयोजकस्वरूपनिरूपणेन सामर्थ्यात् प्रतीतिमवतरति । तच्च सामर्थ्यं मृतेऽपि कौलेयके क्रूरतरस्य सत्त्वान्तरस्य तत्र सद्भावावेदनं नाम, नापरम् । तदेव साधनम् । तयोश्च साध्य-साधनयोरविनाभावनियमो विरोधमूलः । स चानयोर्लोक-प्रमाण-सिद्ध इत्युक्तम् ।

"ननु यद्यतो वाक्यादर्थद्वयावगमः तत् कथमुत्तरस्मिन्नेव नियमेन विश्रान्तिर्न पूर्वस्मिन्, उभयत्रापि वा, तयोः प्राकरणिकत्वेन विशेषाभावात् । उच्यते—न तावदत्र वाच्यानुमेययोरर्थयोः समुच्चयेन अवगतिरुपपद्यते, 'भ्रम मा च भ्रमी'-रिति विधि-निषेधयोरेकाश्रयत्वविरोधात ।

"नापि विकल्पेन, 'भ्रम वा मा वा भ्रमी'-रिति वचनोच्चारणानर्थक्य-प्रसङ्गात् । नाप्यङ्गाङ्गिभावेन, विधि-निषेधयोस्तदसम्भवात् । केवलं योऽसौ भ्रमण-विधौ हेतुभावेन दृप्त-पञ्चाननव्यापारस्तत्रोपात्तः स एव विमृश्यमानः परम्परया धार्मिकस्य तन्निषेधे पर्यवस्यति—

तयोर्बाध्य-बाधकभावेनावस्थानात्। को ह्यनुन्मत्तः कुक्कुरमात्रसद्भाव-भयात् परिहृत-भ्रमणस्तत्रैव दृप्तसिंह-सद्भावशङ्कायामपि सविस्रम्भं भ्रमेदित्यनुमेयार्थ-विश्रान्ति-नियमहेतुर्बाध्य-बाधक-भावोऽस्त्येवात्र विशेषः।....तत्र 'भम धम्मिअ ! वीसत्थो' इति वाक्यार्थ-रूपो भ्रमण-विधिर्वाच्यः। तस्य 'सो सुणओ अज्ज मारिओ देण' इत्यादिना क्रूर-कुक्कुर-मारणं दृप्त-सिंह-विहितं वाक्यार्थरूपमेवार्थो हेतुः। तत्प्रति-षेधस्तु अनुमेय एव न वाच्यः, तस्योक्तनयेनाक्षेपात्। तत्र 'गोला-णई-कच्छ-कुडङ्गवासिणा' इति गोदावरीकच्छ-कुहरस्य धर्मित्व-निदशः। 'दरिअ-सीहेणे'-ति श्व-मारण-कारणाभिधान-द्वारेणोपात्तस्य दृप्त-सिंह-सद्भावस्य हेतुभावः। 'कुडङ्गवासिणे'ति तद्विशेषणेन तस्य धर्मिणि सद्भावोपपादनम्। तस्यास्य हेतोः साध्यस्य च निर्भय-भ्रमण-विधि-लक्षणस्य सहानवस्थान-लक्षणो विरोधः प्रसिद्ध एव इत्येकस्य सद्भावा-वेदनेन अपरस्य स्वभाव-विरुद्धोपलब्ध्या प्रतिषेधे विज्ञायमाने सति समशीर्षिकया उभयार्थप्रतीतिरेवात्र न समस्तीति तद्विश्रान्ति पर्यनुयोगो निरवकाश एव। तेनानुमेय एव भ्रमणस्य निषेधो न व्यङ्ग्य इत्य-वसेयम्, यथा 'नात्र शीतस्पर्शोऽग्ने-' रित्यतः शीतस्पर्शस्य।....अपि चास्मिन्नुदाहरणे दारुणतरान् इतरान् ऋक्षप्रभृतीन् प्रसिद्धतद्व्यापा-रानपास्य यदेतत् करि-कलभ-कुम्भ-निर्भेदैक-हेवाकिनः केसरिणः कौलेयक-वधाभिधानमौचित्यैकनिकेतनस्य कवेस्तत्र चिरं चिन्तयन्तोऽपि अभिप्रायं न विद्मः। न हि दृप्ततया यत्किञ्चन-कारिणोऽन्यस्यापि स्वजाति-समुचितं चरितमपहाय अप्रसिद्धमेव किमपि रसभङ्ग-भीरवः कवयो वर्णयितुमाद्रियन्ते, किमुत जगद्विदित-व्यापारस्य केसरिणः। अनौचित्यनिबन्धो हि परं रसभङ्गकारणं कवयो वदन्ति। यत् स एवाह—

"अनौचित्यादृते नान्यद्रस भङ्गस्य कारणम्।
प्रसिद्धौचित्य-बन्धस्तु रसस्योपनिषत् परा॥—इति"॥

"तस्मात् 'दरिअ-रिक्खेण'—इत्यत्र पाठः श्रेयान् ।।"—*Vyakti-viveka*, Vimarśa. III.

The latter part of Mahimabhaṭṭa's criticism is quite out of place and wide of the mark as Ānandavardhana is not the author of the verse, and he merely quotes it to illustrate his point.

TEXT

§ १४। कचिद्व वाच्ये प्रतिषेधरूपे विधिरूपो यथा—

'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।

मा पहिअ रत्तिअन्धअ सेज्जाए महणिमज्जिहिसि ।।'

EXPOSITION

§ 14. The *gāthā* quoted is VII. 67 of Hāla's anthology. This, too, is addressed by a married lady whose husband is away from home to a traveller (for the time being a guest at her dwelling), who is eager to meet her, but is unable to do so on account of the presence of her mother-in-law. To console him she cleverly states: "Here lies my mother-in-law, and here is my place—mark you, O traveller! daytime as it is, and don't you, blind as you are at night, be silly enough to steal into our beds (through excessive eagerness)." This prohibition, however, is apparent and is only a clever way of expressing the acquiescence of the lady to the traveller's request by giving covert hints as to the time of meeting and cautioning him by making him aware of the mother-in-law's resting-place so that he may not mistake the mother-in-law's bed for that of his love. As Abhinavagupta comments :—

"कांचित् प्रोषितपतिकां तरुणामवलोक्य प्रवृद्धमदनाङ्कुरः सम्पन्नः पान्थोऽनेन निषेधद्वारेण तयाऽभ्युपगम्यते इति निषेधाभावोऽत्र विधिः । न तु निमन्त्रणरूपोऽप्रवृत्तप्रवर्त्तनास्वभावः सौभाग्याभिमान-खण्डनप्रस-

ङ्गात् ।....अत्तेति प्रयत्नेन अनिभृत-संभोग-परिहारः । अथ यद्यपि भवान् मदनशरासारदीर्यमाणहृदय उपेक्षितुं न युक्तः, तथापि किं करोमि पापो दिवसकोऽयमनुचितत्वात् कुत्सितोऽयमित्यर्थः । प्राकृते पुंनपुंसकयोरनियमः । न च सर्वथा त्वामुपेक्षे, यतोऽत्रैवाहं तत् प्रलोकय नान्यतोऽहं गच्छामि । तदन्योन्यवदनालोकन-विनोदेन दिनं तावदतिवाहयाव इत्यर्थः । प्रतिपन्नमात्रायां च रात्रौ अन्धीभूतो मदीयायां शय्यायां मा श्लिषः । अपि तु निभृत-निभृतमेवात्ताभिधान-निकटकण्टकनिद्रान्वेषण-पूर्वकम् इतीयदत्र ध्वन्यते ॥''—*Op. cit.*, pp. 71-73.

Mahimbhaṭṭa's exposition is as follows :—

''अत्र हि चलित-चारित्रमुद्रा प्रोषितपथिकयुवतिः कञ्चित् युवानं वासरावसाने वसतिं प्रार्थयमानमुद्दिश्योत्पन्नमन्मथव्यथावेशा श्वश्रू-सन्निधौ तस्मै शयन-स्थानं विविक्तमुपदिश्य निशान्धताऽध्यारोपेण स्वशयनसंस्पर्श-प्रतिषेधमुखेन श्वश्रूशय्यासंनिवेशदेशं दर्शयन्ती रात्रावत्र मदीय एव शयनीये त्वया निभृतमुपस्थातव्यम्—इति तैस्तैराकारैः प्रतिषेधमुखेन स्वाभिप्रेतमर्थमस्मै निवेदयते ।

''तत्र केचिदविदित-स्वरूपस्यैव पथिकस्य अकस्मान्निशान्धतोपक्षेपः स्व-शयनीयोद्देश-दर्शनं च—इत्युभयमव्यभिचारि साधनमिति मन्यन्ते । तद्वशाद्धि तस्य नायिका-शयनोद्देशोपसर्पणमपि कल्पनीयं स्यात् । श्वश्र्वाश्च तस्याविनयदोषाशङ्कानिरास इत्युभयमपि सिध्यति ।

''यत्त्वत्र श्वश्रूशयनदर्शनं तत् तदाशङ्कानिरासार्थमेव न पथिक-प्रवर्त्तनाङ्गतां गच्छति । आत्मन एव शयनोद्देशदर्शने हि तस्याः शङ्का स्यात् । यद्वा शयनयोर्विप्रकर्ष-प्रकाशनपरं तदिति च । तच्चायुक्तम् । अत्र हि श्वश्रूः प्रत्याय्या वर्त्तते नान्यः । न चायं चिरपरिशीलनावसेयो निशान्धताख्यो हेतुस्तां प्रति सिद्धः । तथाविधश्चोपादीयमानः प्रत्युत तस्याः शङ्कामुपजनयेत् । उभयार्थकारी ह्यत्र हेतुरुपादेयो भवति । यो

न श्वश्रवाः शङ्कामाधत्ते पथिकं च प्रवर्त्तयति। न चायं निशान्धताख्यो हेतुस्तथेति व्यर्थस्तदुपन्यासः।

"किञ्चायं निशान्धतोपक्षेपः पक्षद्वयेऽप्यप्रयोजक एव शयन-सन्निवेशदर्शनसंस्कारादेव तदुभयसिद्धेः।

"ये तु शयनीययोर्विप्रकर्ष-दर्शनेन अन्योन्य-दर्शनस्य अस्फुटत्वमनुमीयमानं हेतुतया मन्यन्ते, अत एव च "अत्ता एत्थ णिमज्जइ" इति पठन्ति, तेऽप्ययुक्तवादिनः। अनकान्तिकत्वात्। दृश्यन्ते हि अचलितचारित्राणामपि युवतीनामेवंविधाः सद्भावगर्भा भणितयः।

"आकार-विशेषाणां हेतुत्व-परिकल्पनमुपहासायैव, तेषां वाच्यत्वाभावात्, वाच्यस्यैव व्यञ्जकत्वेन प्रकृतत्वात्।

"किञ्चात्र निरूप्यमाणो हेतुरेव न लभ्यते। स हि विधेयानुगुणो वा स्यात् प्रतिषेध्यानुगुण उभयानुगुणो वा। तत्राद्यः श्वश्रवाः शङ्कामेव जनयेदसिद्धत्वात् चाक्षुषत्वादिवत्। द्वितीयो न विवक्षितार्थ-सिद्धिहेतुर्विरुद्धत्वात्। कृतकत्वमिव नित्यत्वे। तृतीयस्तु सन्देहमेव जनयत्यनैकान्तिकत्वात्, प्रमेयत्वादिवदिति। यदाहुः—

"नासिद्धो भाव-धर्मोऽस्ति व्यभिचार्युभयाश्रयः।
धर्मो विरुद्धो भावस्य सा सत्ता साध्यते कथम्॥' इति।

"अपि च यथाऽऽद्य उदाहरणे भ्रमणविधिहेतुरेव निरूप्यमाणः प्रतिषेधे पर्यवस्यति न तथेह प्रतिषेधहेतुरेव विधाविति कुतो विधिरूपार्थान्तरप्रतीति-सिद्धिः। तस्माद्विधेयस्य अर्थान्तरस्य निबन्धनाभावात् प्रतीतिरेव नास्तीति कुतस्तस्य व्यङ्ग्यत्वमित्ययुक्तमेवेदमुदाहरणम्॥"—*Vyakti viveka*, pp. 403-407.

Thus according to Mahimbhaṭṭa, Ānandavardhana is not justified in citing the above *gāthā* as an illustration of suggestion, since there is no necessary and invariable relation between the expressed sense (निषेध) and the so called suggested sense (विधि) which in Mahimabhaṭṭa's opinion is the pre-

requisite and essential condition of suggestion which, in reality, is no other than Inference.

The following verse from S'rīharṣa's *Naiṣadhacarita* is interesting as it has some bearing on the present illustration :—

निषेधवेशो विधिरेष तेऽथवा
तवैव युक्ता खलु वाचि वक्रता ।
विजृम्भितं यस्य किल ध्वनेरिदं
विदग्धनारी-वदनं तदाकरः ॥—Canto. IX. 50

TEXT

§ १५ । क्वचिद् वाच्ये विधिरूपेऽनुभयरूपो यथा—
'वच्च मह व्विअ एक्केइ होन्तु णीसास-रोइअव्वाइं ।
मा तुज्झ वि तीअ विणा दक्खिण्ण-हअस्स जाअन्तु ॥'

EXPOSITION

§ 15. The suggested sense in the illustration does not stand in the relation of contradiction (विरोध) with the expressed sense (वाच्यार्थ) as in the preceding two *gāthās*. Here the injunction (विधि) —viz. व्रज, does not suggest its negation—viz. व्रज्याभाव, as in the first case by भ्रमण, भ्रमणाभाव was suggested. Nor there is any suggestion of a separate injunction as such. The suggested sense here bears no definite relation with the expressed sense and can neither be classed under विधि nor under निषेध and as such is termed अनुभयरूप. As Abhinavagupta explains :—

"अत्र व्रजेति विधिः । न प्रमादादेव नायिकान्तर-संगमनं तव, अपि तु गाढानुरागात्—येनान्यादृङ् मुखरागः, गोत्रस्खलनादि च । केवलं पूर्वकृतानुपालनात्मना दाक्षिण्येनैकरूपत्वाभिमानेनैव त्वमत्र स्थितः । तत् सर्वथा शठोऽसि इति गाढमन्युरूपोऽयं खण्डितनायिकाभिप्रायोऽत्र प्रतीयते । न चासौ व्रज्याऽभावरूपो निषेधः, नापि विध्यन्तरमेव

अन्य-निषेधाभावः ।।"—*Op. cit.*, pp. 73-74. Compare : 'उपचार-विधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोऽपि भावशून्यः ।'—*Mālavikāgni-mitra*, III. 3. Mahimabhaṭṭa's comments on the above *gāthā* are as follows :—

"अत्र कयाचित् खण्डितयाऽन्तर्ज्वलितेर्ष्याप्रकोपया सावहित्थं सोल्लुण्ठनं सप्रणयौचित्यं च यः प्रियं प्रति भेदो(?) विहितस्तत्र तस्यामेव भवान् निर्व्याजमनुरक्तहृदयो मयि तु कितव ! तव कृतकोप-चार-वचन-रचनामात्रमेतदिति नायकस्यान्यत्र अनुरागातिशयः साध्यः ।

"तत्र च गच्छ तद्विरह-विहितानि निःश्वास-रोदितव्यानि ममैव एकस्या भवन्तु मा तवापि दाक्षिण्यमात्रविवशस्य तया विना तानि भूवन् इति तत्र तस्य प्रस्थानानुमतिर्हेतुः । प्रस्थाने हि तस्य तद्विरहविरतिः। तद्विरतौ च तद्धेतुकानां निःश्वास-रोदनादि-दुःखानामपि विरतिः । स्नेहोत्कर्षानुविधायिनो हि प्राणिनां विरह-व्यथावेशा भवन्ति, तेषां तत्कार्यत्वात्, कार्य-कारण-भावश्चास्य हेतोः सतोऽसत एव वा प्रति-षेधसामर्थ्यादवसीयते, प्राप्तिपूर्वका हि प्रतिषेधा भवन्तीति। तस्य च सत्यासत्यत्व-विचारो निरुपयोग एव तत्प्रतीति-परमार्थत्वात् काव्य-नाट्यादीनाम्—इति विरह-व्यथावासितोऽनुरागातिशयः कान्तस्यानुमेय एव न व्यङ्ग्य इत्यवसेयम् ।।"—*Vyaktiviveka*, pp. 407-408.

TEXT

§१६ । क्वचिद्व वाच्ये प्रतिषेधरूपेऽनुभयरूपो यथा—

'दे आ पसिअ णिवत्तसु मुह-ससि-जोह्ना-विलुत्त-तमणिवहे ।
अहिसरिआणं विग्घं करोसि अण्णाणं वि हआसे ।।'

EXPOSITION

§16. According to some, in this prākrit *gāthā*, a lover shrewdly praises the beauty of the maiden he loves. Their explanation is as follows :—

"अत्र व्यवसितात् गमनात् निवर्त्तस्वेति प्रतीतेर्निषेधो वाच्यः। गृहागता नायिका गोत्र-स्खलिताद्यपराधिनि नायके सति ततः प्रतिगन्तुं प्रवृत्ता, नायकेन चाटूपक्रमपूर्वकं निवर्त्यते। न केवलं स्वात्मनो मम च निर्वृति-विघ्नं करोषि, यावदन्यासामपि। ततस्तव न कदाचन सुख-लव-लाभोऽपि भविष्यतीत्यत एव हताशासीति वल्लभाभिप्रायरूपश्चाटुविशेषो व्यङ्ग्यः।

"यदि वा सख्या उपदिश्यमानाऽपि तदवधीरणया गच्छन्ती सख्योच्यते—न केवलमात्मनो विघ्न करोषि, लाघवादबहुमानास्पदमात्मानं कुर्वती, अत एव हताशा, यावद् वदन-चन्द्रिका-प्रकाशित-मार्गतया अन्यासामपि अभिसारिकाणां विघ्नं करोषीति सख्यभिप्रायरूपश्चाटुविशेषो व्यङ्ग्यः।"

But Abhinavagupta demurs against such interpretations, for then this verse cannot be legitimately cited as an illustration of *Dhvani*, but it is reduced to a case of गुणीभूतव्यङ्ग्य where the suggested sense is subordinated to the expressed sense, which becomes the object of final cognition and relish. As he remarks :—

'अत्र तु व्याख्यानद्वयेऽपि व्यवसितात् प्रतीपगमनात् प्रियतमगृहगमनाच्च निवर्त्तस्वेति पुनरपि वाच्य एव विश्रान्तेर्गुणीभूतव्यङ्ग्यभेदस्य प्रेयोरसवदलंकारस्योदाहरणमिदं स्यात्, न ध्वनेः।'— So he furnishes his own interpretation of the verse in the following words :—

"तेनायमत्र भावः—काचिद् रभसात् प्रियतममभिसरन्ती तद्गृहाभिमुखमागच्छता तेनैव हृदय-वल्लभेन एवमुपश्लोक्यतेऽप्रत्यभिज्ञानच्छलेन अत एव आत्मप्रत्यभिज्ञापनार्थमेव नर्मवचनं 'हताशे' इति। अन्यासाञ्च विघ्नं करोषि तव चेप्सित-लाभो भविष्यतीति का प्रत्याशा। अत एव मदीयं वा गृहमागच्छ, त्वदीयं वा गच्छाव इत्युभयत्रापि तात्पर्यात् अनुभयरूपो वल्लभाभिप्रायश्चाट्वात्मा व्यङ्ग्य इयत्येव व्यवतिष्ठते।"—*Op. cit.*, pp. 75-76.

Mahimabhaṭṭa thus establishes the inferential character of the suggested sense in the above illustration :—

"अत्र काचित् कामपि निशान्धकाराभिसरण-समुद्यतां सहजसौन्दर्य-कान्तिकमनीयमुखीं सखीमालोक्य मुदितान्तःकरणा प्रणयोपालम्भनिभेन तस्यास्तां रूपसम्पदम् इत्थमुपवर्णयति—इति चाटुकार्थोऽत्र प्रतीयमानोऽनुमेयः। तत्र च वाच्यस्य प्रतिषेधानुपपत्तिरेव हेतुः। तदनुपपत्तिश्च सम्बोधनद्वारेण उपात्तस्य मुख-शशिज्योत्स्नाविलुप्त-तमोनिवहत्वस्य हेतोरार्थस्यासिद्धेः, परमार्थतो मानुषीमात्रस्य तथाविधाया वदनेन्दुकान्तेरसम्भवात्। अतस्तस्याः तदन्यासां चाभिसारिकाणाम् अभिसरणविघ्न एव न सम्भवतीति तत्प्रतिषेध-प्रणयप्रयासः सख्याः तस्याम् अनर्थक एवेति प्रतिषेध-विधेरनुपपत्तिसिद्धिः। अतो वदनेन्दुकान्तेर्यदेतत् 'विलुप्त-तमो-निवहत्वम्' उपात्तम् तद् अन्यथाऽनुपपद्यमानं वदनस्य कान्त्यतिरेकलक्षणमर्थान्तरमेव चाटुरूपम् अनया भङ्ग्याऽनुमापयति। कान्त्यतिरेकमन्तरेण निर्मूलस्य तदतिशयारोपस्य लोकैरनादृतत्वात् इति तत्प्रमाणसिद्ध एवानयोः सम्बन्धो बोद्धव्यः।"—*Vyaktiviveka*, pp. 408-409.

TEXT

§१७। क्वचिद् वाच्याद् विभिन्न-विषयत्वेन व्यवस्थापितो यथा—
'कस्स वा न होइ रोसो दट्ठूण पिआएँ सव्वणं अहरम्।
सभमर-पउमग्घाइणि वारिअवामे सहसु एह्णिम्॥'

EXPOSITION

§17. In all the previous illustrations, both the expressed and the suggested senses are cognised by the same person—viz. by the ascetic in the first illustration, by the traveller in the second, by the lover in the third and by the *fiance'e* in the fourth. But this illustration is cited by the author to show that while the expressed sense is cognised by one person,.

the suggested sense is cognised by quite another person, the *substrata* of the cognitions of these two senses being thus distinct (विभिन्न-विषय). And, this is also another reason why the suggested sense must be held to be different from the expressed sense. As Abhinavagupta puts it :—

'एवं वाच्य-व्यङ्ग्ययोर्धार्मिक-पान्थ-प्रियतमाभिसारिका-विषयैक्येऽपि स्वरूप-भेदाद् भेद इति प्रतिपादितम् । अधुना तु विषय-भेदादपि व्यङ्ग्यस्य वाच्याद् भेद इत्याह—क्वचिद् वाच्याद् इति ।''—°*Locana*, p. 76.

The *gāthā* is addressed to a lady by a maid-in-waiting in the presence of her husband : "Who is not enraged to see the lips of his beloved (thus) scarred ? Now dost thou withstand (all the admonitions of thy husband) as thou didst smell the lotus with bees (humming) in it, disobeying all our requests to the contrary.'' The husband, ignorant as he is of his wife's conduct, takes the maid's words at their face value, while the suggested sense—viz. the dalliance with her paramour (whose kisses caused the scars on her lips), is cleverly hinted at by the maid with an eye to the lady. Abhinavagupta brings out a variety of suggested meanings in this *gāthā*, each intended for a particular person and thus explains the verse :—

"अत्रायं भावः—काचिदविनीता कुतश्चित् खण्डिताधरा निश्चित-तत्सविध-संनिधाने तद्भर्त्तरि तमनवलोकमानयेव कयाचिद् विदग्ध-सख्या तद्वाच्यता-परिहारायैवमुच्यते । सहस्वेदानीम्-इति वाच्यम-विनयवतीविषयम् । भर्त्तृविषयं तु—अपराधो नास्तीति आवेद्यमानं व्यङ्ग्यम् । सहस्वेत्यपि च तद्विषयं व्यङ्ग्यम् । तस्यां च प्रियतमेन गाढमुपालभ्यमानायां तद्व्यलीक-शङ्कित-प्रातिवेशिक-लोकविषयं चाविनय-प्रच्छादनेन प्रत्यायनं व्यङ्ग्यम् । तत्सपत्न्यां च तदुपालम्भ-

तदविनय-प्रहृष्टायां सौभाग्यातिशयख्यापनं प्रियाया इति शब्दबलादिति सपत्नीविषयं व्यङ्ग्यम् । सपत्नी-मध्ये इयता खलीकृताऽस्मीति लाघवमात्मनि ग्रहीतुं न युक्तम्, प्रत्युतायं बहुमानः, सहस्व शोभस्वेदानीम् इति सौभाग्यप्रख्यापनं व्यङ्ग्यम् । 'अद्ययं तव प्रच्छन्नानुरागिणी हृदयवल्लभा इत्थं रक्षिता, पुनः प्रकटरदन-दंशव-निधिर्न विधेयः'-इति तच्चौर्य-कामुक-विषय-सम्बोधनं व्यङ्ग्यम् । 'इत्थं मयैतदपह्नुतम्' इति स्व-वैदग्ध्यख्यापनं तटस्थ-विदग्ध-लोकविषयं व्यङ्ग्यम् इति । तदेतदुक्तं 'व्यवस्थापित'-शब्देन ।" —*Op. cit.*, pp. 77-78.

Compare also Māṇikyacandra's commentary on Mammaṭa's *Kāvyaprakās'a* called *Kāvya-Prakās'a-Saṁketa*, pp. 178-179 (Mysore Edn.). Vidyādhara reproduces *verbatim* Abhinavagupta's words. See *Ekāvalī*, pp. 46-47.

"अत्र काचिद् विदग्धा सखी कामपि कामुकान्तिके पर-पुरुष-परिक्षताधर-पल्लवामालोक्य तदसहन-स्वभावं च तं कामुकमाकलय्य तस्याः पर-परिभोगशङ्का-कलङ्कमपाकर्त्तुमधरक्षतस्यान्यथासिद्धत्वमुपालम्भनिभेन तामाह । तत्र सव्रण-वल्लभाधर-दलदर्शनं सर्वथैव कामुकलोकस्य ईर्ष्याप्रकोप-कारणं भवेदिति व्याप्ति-वचनम् । तव च वारितवामायाः सभ्रमराम्भोजाघ्राण-शीलायास्तन्निबन्धनमिदमधरस्य सव्रणत्वमिति पक्षधर्मोपसंहारः । सह्यतामिदानीं तस्य निजस्याविनयस्य विपाकः प्रियतम-प्रकोप-रूपस्त्वयेति निगमननिर्देशः—इति वाच्यार्थविषयः साध्य-साधन-भावस्तावत् स्पष्ट एव ।। अनुमेयार्थ-विषये तु तस्मिन् परपुरुष-भोग-शङ्कानिरासः साध्यः । तस्य सभ्रमराम्भोजाघ्राणशीलत्वेन सम्बोधन-समर्पितेन अनुमितमधर-पल्लव-परिक्षतेरन्यथासिद्धत्वम् आर्थो हेतुः । तयोश्चाविनाभाव-नियमोऽनुरागिणामध्यात्मप्रमाण-सिद्ध एवेति ; म् ।।—*Vyaktiviveka*, pp. 411-412. In this passage, Mahimabhaṭṭa establishes the inferential character of the so-called suggested sense in the *gathā* **'कस्स व—'**.

TEXT

§१८। अन्ये चैवंप्रकारा वाच्याद्विभेदिनः प्रतीयमानभेदाः सम्भवन्ति। तेषां दिङ्मात्रमेतत् प्रदर्शितम्॥

EXPOSITION

§18. Hemacandra, in his *Kāvyānuśāsana*, adds a few more illustrations besides those already cited by our author with a view to bringing out the difference of the suggested sense from the expressed sense. We quote here the relevant extracts for the facility of the readers :—

"मुख्य-गौण-लक्ष्यार्थ-व्यतिरिक्तः प्रतीति-विषयो व्यङ्ग्यार्थः। स च ध्वन्यते द्योत्यते इति ध्वनिरिति पूर्वाचार्यैः संज्ञितः। अयं च वस्त्वलंकार-रसादिभेदात् त्रिधा। तथाहि आद्यस्तावत् प्रभेदो मुख्यादिभ्योऽत्यन्तं भिन्नः। (१) स हि वाच्ये विधिरूपे प्रतिषेधरूपो यथा—

'भम धम्मिअ—' इति।

(२) क्वचिन्निषेधे विधिर्यथा—'अत्ता इत्थ नु मज्जइ—' इति।..।

(३) क्वचिद् विधौ विध्यन्तरं यथा—

"बहलतमा हअराई अज्ज पउत्थो मई गहं सुणणम्।
तह जग्गेसु सअज्जिअ न जहा अम्हे मुसिज्जामो।"[1]

अत्र यथा वयं न मुष्यामहे तथा त्वं जागृहीति विध्यभिधाने रात्रि-रत्यन्धकारा, पतिः प्रोषितः, गृहं शून्यमतस्त्वमभयो मत्पार्श्वम् आग-च्छति विध्यन्तरं प्रतीयते॥ (४) क्वचिन्निषधे निषेधान्तरं यथा—

"आसइयं अणाएण जेत्तियं तत्तिएण बंधदिहिं।
उरमसुवसह इन्हिं रक्खिज्जइ गहवईच्छित्तम्॥"

—अत्र गृहपति-क्षेत्रे दुष्ट-वृष-वारण-परे निषेध-वाक्ये उपपतिवारणं निषेधान्तरं प्रतीयते॥ (५) क्वचिदविधिनिषेधे विधिर्यथा—

---

1. Hāla's *Gāhāsattasaī*, IV. 35 (NSP. Edn.) : "गृहं शून्यमित्य-नेनेहैव स्वच्छन्दमागच्छेति ध्वनितम्।"—Gaṅgādhara Bhaṭṭa's gloss.

"महुएहिं किं च पन्थिअ जइ हरसि नियसणं नियम्बाओ।
साहेमिकस्स रत्ने गामो दूरे अहं एक्का ।।"—इति।

—अत्र विधि-निषधयोरनभिधाने अहमेकाकिनी, ग्रामो दूरे इति विविक्तोपदेशात् नितम्बवासोऽपि मे हरेति विधिः प्रतीयते ।।(६) क्वचिदविधिनिषेधे निषेधो यथा—

"जीविताशा बलवती धनाशा दुर्बला मम।
गच्छ वा तिष्ठ वा पान्थ स्वावस्था तु निवेदिता ।।"[1]

—अत्र गच्छ वा तिष्ठ वेति अविधि-निषेधे "जीविताशा बलवती धनाशा दुर्बला मम" इति वचनात् 'त्वया विनाहं जीवितुं न शक्नोमि'-इत्युपक्षेपेण गमन-निषेधः प्रतीयते ।। (७) क्वचिद् विधि-निषेधयोर्विध्यन्तरं यथा—

"णिअ-दइअ-दंसनुक्खित्त पहिअ अण्णेण वच्चसु पहेण।
गहवइ-धूया दुल्लङ्घ-वागुरा इह हयग्गामे ।।"

—अत्र अन्येन पथा व्रजेति विधि-निषेधयोरभिधाने 'हे स्वकान्ताभिरूपताविकत्थन पान्थाभिरूपक! इह ग्रामे भवतो गृहपति-सुता द्रष्टव्य-रूपे'ति विध्यन्तरं प्रतीयते ।। (८) क्वचिद् विधि-निषेधयोर्निषेधान्तरं यथा—

"उच्चिणसु पडिअकुसुमं मा घुण सेहालिय हलिअ-सुन्हे।
एस अवसाण-विरसो ससुरेण सुओ वलय-सद्दो ।।"

अत्र पतितं कुसुममुच्चिनु मा धुनीहि शेफालिकामिति विधि-निषेधयोरभिधाने 'सखि! चौर्यरते प्रसवते वलय-शब्दो न कर्त्तव्यः'—इति निषेधान्तरं प्रतीयते ।। (९) क्वचिद्विधौ अनुभयं यथा—

"सिनियं वच्च किसोयरि पएण यत्तेण ढविसु महिवट्ठे।
मज्जिहि सिविच्छयच्छणि विहिणा दुरेकण-निम्मचिया ।।"

—अत्र शनैर्व्रजेति विध्यभिधाने न विधिर्नापि निषेधः, अपि तु वर्णनामात्रं प्रतीयते ।।

---

1. Daṇḍin's *Kāvyādarśa*. II. 139

(१०) क्वचिन्निषेधेऽनुभयं यथा—

'देआ पसिअ...''

(११) क्वचिद्विधि-निषेधयोरनुभयं यथा—''वच्च महं विअ—'' इति।

(१२) क्वचिदविधिनिषेधेऽनुभयं यथा—

''णह-मुह-पसाहिअंगो निद्दाघुम्मन्त-लोयणो न तहा।

जह निव्वणाहरोसा मलंग दूमेसि मह हिययम्॥''

—विगतमत्सराया मम न तथा नख-पदादि-चिह्नं भवदङ्ग-सङ्गि खेदावहं यथार्ध-निष्पन्न-संभोगतयाऽधरदशनासंपत्तिरितीर्ष्या-कोप-गोपनमुपभोगोद्भेदेन कृतं वाच्योऽर्थः। तद्बल-समुत्थस्तु सहृदयोत्-प्रेक्षितोऽत्यन्त वाल्लभ्यान्मुख-चुम्बनपर एव तस्यास्त्वं यत्त्वदधर-खण्ड-नावसरोऽस्या वराक्या न जात इति न केवलं तस्या भवानतिवल्लभो यावद् भवतोऽपि सा सुतरां रोचते इति वयमिदानीं त्वत्प्रमनिराशाः संजाता इति नायिकाभिप्रायो व्यङ्ग्यः॥

(१३) क्वचिद् वाच्याद्विभिन्न-विषयत्वेन व्यवस्थापितो यथा—

''कस्स व न होइ रोसो....'' इति॥

—*Op. cit.*, pp. 26-34.

TEXT

§ १९। द्वितीयोऽपि प्रभेदो वाच्याद्विभिन्नः सप्रपञ्चमग्रे दर्शयिष्यते।

तृतीयस्तु रसादिलक्षणः प्रभेदो वाच्य-सामर्थ्याक्षिप्तः प्रकाशते, न तु साक्षात् शब्दव्यापार-विषय इति वाच्याद्विभिन्न एव। तथा हि वाच्यत्वं तस्य स्वशब्द-निवेदितत्वेन वा स्यात्, विभावादि-प्रतिपादन-मुखेन वा। पूर्वस्मिन् पक्षे स्वशब्द-निवेदितत्वाभावे रसादीनामप्रतीति-प्रसङ्गः। न च सर्वत्र तेषां स्वशब्द-निवेदितत्वम्। यत्राप्यस्ति तत्, तत्रापि विशिष्ट-विभावादिप्रतिपादनमुखेनैवैषां

प्रतीतिः। स्वशब्देन सा केवलमनूद्यते, न तु तत्कृता। विषयान्तरे तथा तस्या अदर्शनात्। न हि केवल-शृङ्गारादि-शब्दमात्रभाजि विभावादि-प्रतिपादन-रहिते काव्ये मनागपि रसवत्त्व-प्रतीतिरस्ति। यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावा-दिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः। केवलाच्च स्वाभिधानाद-प्रतीतिः। तस्मादन्वय-व्यतिरेकाभ्याम् अभिधेय-सामर्थ्याक्षिप्तत्वमेव रसादीनां, न तु अभिधेयत्वं कथञ्चित्—इति तृतीयोऽपि प्रभेदो वाच्याद् भिन्न एवेति स्थितम्। वाच्येन त्वस्य सहेव प्रतीतिरित्यग्रे दर्शयिष्यते॥

EXPOSITION

§ 19. द्वितीयोऽपि प्रभेदः—refers to that variety where the sugges-ted sense is in the form of a figure of speech (अलंकार), which is reducible to a particular kind of relation (सम्बन्ध) as subsis-ting between the व्याच्यार्थ and the व्यङ्ग्यार्थ. अग्रे दर्शयिष्यते—As the suggestion of अलंकार's is much more varied and complex than that of mere वस्तु (fact), it is dealt with *in extenso* in the *Second Uddyota*, a major portion of which is devoted to the discussion of the nature of अलंकारध्वनि. As Abhinavagupta observes :—अग्रे इति। द्वितीयोद्द्योते 'असंलक्ष्यक्रमव्यङ्ग्यः क्रमेण द्योतितः परः' (ध्वन्या° २।४) इति विवक्षितान्यपर-वाच्यस्य द्वितीय-प्रभेदवर्णनावसरे। यथा हि विधि-निषेध-तदनुभयात्मना रूपेण संकलय्य वस्तुध्वनिः संक्षेपेण सुवचः, तथा नालंकारध्वनिः, अलंकाराणां भूय-स्त्वात्। अत एवोक्तं सप्रपञ्चमिति।"—*Op. cit.*, p. 78.

तृतीयस्तु रसादिलक्षणः........इति वाच्याद्विभिन्न एव—The particle तु (तृतीयस्तु) serves to differentiate the third variety of suggestion of रस, भाव etc. from the previous two categories. For while वस्तु and अलंकार can be at times

conveyed through denotation, रस, भाव etc. are always suggested. See *Supra*. "तु-शब्दो व्यतिरेके। वस्त्वलंकारावपि शब्दाभिधयत्वमध्यासाते तावत्। रस-भाव-तदाभास-तत्प्रशमाः पुनः न कदाचिदभिधीयन्ते, अथ चास्वाद्यमान-प्राणतया भान्ति। तत्र ध्वननव्यापारादृते नास्ति कल्पनान्तरम्। स्खलद्-गतित्वाभावे मुख्यार्थबाधादेर्लक्षणानिबन्धनस्यानाशङ्कनीयत्वात्॥"—°*Locana*, p. 78.[1]

It is interesting to note here that while the followers of the Dhvani school hold that रस, भाव etc. must always be suggested, Udbhaṭa, the reputed author of the *Kāvyālaṁkāra-Sāra-Saṁgraha*, explicitly states that रस (according to him a variety of अलंकार) can be *expressed* in five different ways—viz. through स्व-शद, स्थायि-भाव, संचारि-भाव, विभाव and अभिनय. Thus, according to him, if any sentiment is expressed though the general term रस or through any of the particular terms like श्रृङ्गार, करुण etc, there would be no impediment in the way of our realisation of the sentiment. Compare :—

रसवद्दर्शित-स्पष्ट-श्रृङ्गरादि-रसोदयम्।
स्वशब्द-स्थायि-सञ्चारि-विभावाभिनयास्पदम्॥
श्रृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः।
बीभत्साद्भुत-शान्ताश्च नव नाट्ये रसाः स्मृताः॥"

—*Kāvyālaṁkāra-Sāra-Saṁgraha*, IV. 3-4.
(Bombay Sans. Series Edn. p. 52.)

Pratīhārendurāja's commentary on the above verses is as follows :—

---

1. Compare : "प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।
किंच मुख्यार्थबाधस्य विरहादपि लक्षणा॥"
—Viśvanātha's *Sāhitya-Darpaṇa*, *V*. 3.

"एषां च शृङ्गारादीनां नवानां स्व-शब्दादिभिः पञ्चभिरवगतिर्भवति। यदुक्तं भट्टोद्भटेन[1]—'पञ्चरूपा रसा' इति। तत्र स्व-

---

1. The quotation 'पञ्चरूपाः रसाः' attributed to Udbhaṭa, cannot be traced to any known work. Most probably it is from Udbhaṭa's lost commentary on Bhāmaha's *Kāvyālaṁkāra* or from his commentary on Bharata's *Nāṭya-S'āstra*, which too is lost. That Udbhaṭa wrote a commentary on the *Nāṭya-S'āstra* is attested by the following verse :—

'व्याख्यातारो भारतीये लोल्लटोद्भट-शङ्कुकाः ।
भट्टाभिनवगुप्तश्च श्रीमान् कीर्त्तिधरोऽपरः ॥"—S'āradātanaya's *Bhāvaprakās'a* It is to be noted that the same quotation is found in the commentary on Hemacandara's *Kāvyânus'āsana:* "रसादेः स्व-शब्दोक्तिः क्वचित् संचारि-वर्जं दोषः"—*Op. cit., III*, on which Hemacandra himself comments-एतेन-"रसवद् दर्शित-स्पष्ट-शृङ्गारादिरसोदयम् । स्व-शब्द-स्थायि-संचारि-विभावाभिनयास्पदम्"—इत्येतद्-व्याख्यानावसरे यद् भट्टोद्भटेन 'पञ्चरूपा रसा' इत्युपक्रम्य 'स्व-शब्दाः शृङ्गारादेर्वाचकाः शृङ्गारादयः शब्दाः' इत्युक्तम्, तत् प्रतिक्षिप्तम् ।—*Op. cit.*, pp. 110-111. (NSP. Edn.).

Kuntaka in his *Vakroktijīvita* criticises in sarcastic terms the fantastic view of Udbhaṭa, that रस, भाव etc. can be expressed through denotation (i.e. स्व-शब्दवाच्य): "यदपि कैश्चित्-'स्व-शब्दस्थायि संचारि-विभावाभिनयास्पदम्' इत्यनेन पूर्वमेव लक्षणं (i.e., रसवद् दर्शितस्पष्ट शृङ्गारादि-रसोदयम्'—इति भामहकृतं लक्षणम्) विशेषितम्, तत्र स्व-शब्दास्पदत्वं रसानाम् अपरिगतपूर्वमस्माकम् । ततस्त एव रस-सर्वस्वसमाहितचेतसस्तत्-परमार्थविदो विद्वांसः परं प्रष्टव्याः—किं स्व-शब्दास्पदत्वं रसानामुत रसवतः इति। तत्र पूर्वस्मिन् पक्षे रस्यन्ते इति रसास्ते स्वशब्दास्पदास्तेषु तिष्ठन्तः शृङ्गारादिषु वर्त्तमानाः सन्तस्तज्ज्ञैरास्वाद्यन्ते । तदिदमुक्तं भवति—यत् स्व-शब्दैरभिधीयमानाः श्रुतिपथमवतरन्तः चेतनानां चर्वण-चमत्कारं कुर्वन्तीत्यनेन न्यायेन घृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसम्पदं सम्पादयन्तीत्येवं सर्वस्य कस्यचित् उपभोगसुखार्थिनः तैरुदारचरितैरयत्नेनैव तदभिधानमात्रादेव त्रैलोक्य-राज्य-सम्पत्सौख्य-समृद्धिः प्रतिपाद्यते इति नमस्तेभ्यः ।"

शब्दाः शृङ्गारादेर्वाचकाः शृङ्गारादयः शब्दाः। स्थायिनो रसाना-मुपादान-कारण-प्रख्या रत्यादयो नव भावाः। संचारिणस्तु निर्वेदा-दयो रसानामवस्थाविशेषरूपाः। विभावास्तु तेषां निमित्त-कारणभूता योषिदादयः ऋतु-माल्यानुलेपनादयश्च। आङ्गिकादयस्तु चत्वारो रसानां कार्यभूता अभिनयाः। एतेषां च स्व-शब्दादीनां समस्त-व्यस्ततया आस्पद-त्वात् येन काव्येन स्फुटरूपतया शृङ्गारादि-रसाविर्भावो दृश्यते तत् काव्यं रसवत्। रसाः खलु तस्यालंकारः।"—The illustrations given by Udbhaṭa from his lost *Kumārasambhava* are as follows :—

"इति भावयतस्तस्य समस्तान् पार्वतीगुणान्।
संभृतानल्प-संकल्पः कन्दर्पः प्रबलोऽभवत्॥
स्विद्यताऽपि स गात्रेण बभार पुलकोत्करम्।
कदम्ब-कलिकाकोश-केशर-प्रकरोपमम्॥
क्षणमौत्सुक्य-गर्भिण्या चिन्ता-निश्चलया क्षणम्।
क्षणं प्रमोदालसया दृशाऽस्यास्यमभूष्यत॥"

Pratihārendurāja thus explains them :—

"कदम्बकलिकाकोशः कदम्बकलिकाभ्यन्तरम्। अत्र भगवत आभिलाषिकविप्रलम्भशृङ्गारो निबद्धः। तस्य स्व-शब्दः कन्दर्पः प्रबल इति। स्थायी तत्रैव स्व-शब्देनैवोन्मीलितः कन्दर्प इति। रति-परिपोषात्मको हि शृङ्गारो रसः। रतिश्च यूनोर्मन्मथात्मिका। अतो रति-विशेषस्य वाचकत्वात् कन्दर्पशब्दः स्थायिनोऽत्र स्व-शब्दः। संचारिणश्च औत्सुक्य-चिन्ता-हर्षाः स्व-शब्देनोन्मीलिताः। स्वेद-रोमाञ्चौ च सात्त्विकौ स्व-शब्दोपात्तौ। तयोरपि च संचारित्वम्। सात्त्विकानां स्थायि-भावावस्था-विशेषत्वेन निर्वेदादिवत् सञ्चारित्वात्। विभावस्तु भावयतस्तस्येति निर्दिष्टः। भगवती हि तत्तद्गुणोपेतत्वेन विभाव्यमाना विभावः। अभिनयस्तु अत्र अपाङ्गाभिनयो निर्दिष्टः— दृशा इति। अतोऽत्राभिलाषिकः शृङ्गाररसः स्व-शब्दादिभिः पञ्चभिर-भिव्यज्यते।"—*Ibid.*, pp. 53-54. Thus Udbhaṭa's view about

rasa runs counter to that of the Dhvani theorists, who hold it as a grave defect of a poem if any *rasa* or the स्थायिभाव or संचारिभाव pertaining to it is *expressed* through the denotative power of words. So Mammaṭa says: "व्यभिचारिरस-स्थायिभावानां शब्दवाच्यता"—*Kāvya-Prakā'sa, VII.* 60. Thus it is not improbable that the present section of the *Dhvanyāloka* is directed against Udbhaṭa's position.

नहि केवल....मनागपि रसवत्त्व-प्रतीतिरस्ति—Had the sentiments like शृङ्गार etc. been liable to be conveyed through the expressive or Denotative power (अभिधा-व्यापार) of words a mere perusal of the verse—"शृङ्गार-हास्य-करुण-रौद्रवीर-भयानकाः। वीभत्साद्भुत-शान्ताश्च नाट्ये नव रसाः स्मृताः ॥"—would have given rise to the realisation of all the different sentiments. But this is not so. Consequently it must be granted that the realisation of the aesthetic emotions depends on the proper presentation of विभाव's, अनुभाव's and संचारि-भाव's through words embellished with attractive figures of speech.

वाच्येन त्वस्य....इत्यग्रे दर्शयिष्यते--रस, भाव etc. are called असंलक्ष्य-क्रम-व्यङ्ग्य in contradistinction with वस्तु and अलंकार that are styled संलक्ष्य-क्रम-व्यङ्ग्य, for in the case of the former group no sequence is observable between the cognition of the expressed sense (viz. विभाव's, अनुभाव's, and संचारिभाव's) and the final aesthetic relish. Compare :—

'रस-भाव-तदाभास-भावशान्त्यादिरक्रमः ।

ध्वनेरात्माऽङ्गिभावेन भासमानो व्यवस्थितः ॥'—*Dhvanyāloka, II.* 3. Also : 'न खलु विभावानुभाव-व्यभिचारिण एव रसः, अपि तु रसस्तैरित्यस्ति क्रमः, स तु लाघवान्न लक्ष्यते ॥'—*Kāvyaprakās'a, IV.* Abhinavagupta thus brings out the significance of the indeclinable particle इव in सहेव—

"इव-शब्देन विद्यमानोऽपि क्रमो न संलक्ष्यते—इति तद् दर्शयति।"
—*Op. cit*, p. 84.

TEXT

§२०। काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।

क्रौञ्च-द्वन्द्व-वियोगोत्थः शोकः श्लोकत्वमागतः॥५*

विविध-वाच्य-वाचक-रचना-प्रपञ्च-चारुणः काव्यस्य स एवार्थः सारभूतः। तथा चादिकवेर्वाल्मीकेः निहत-सहचरी-विरहकातर-क्रौञ्चाक्रन्दजनितः शोक एव श्लोकतया परिणतः। शोको हि करुण-रस-स्थायिभावः। प्रतीयमानस्य चान्यभेद-दर्शनेऽपि रस-भाव-मुखेनैवोपलक्षणं प्राधान्यात्॥

EXPOSITION

§20. स एवार्थः—Though सः ought to refer to the Suggested sense, in general, yet in the present *Kārikā* the *third* variety of suggestion—viz. रसध्वनि, is mainly in view in consonance with what follows. As Abhinavagupta observes :—

"स एवेति प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्, इतिहास-बलात् प्रक्रान्त-वृत्तिग्रन्थबलाच्च। तेन रस एव वस्तुत आत्मा, वस्त्वलंकार-ध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तौ इत्यभिप्रायेण 'ध्वनिः काव्यस्यात्मा' इति सामान्येनोक्तम्।"—*Locana*, p. 85.

The second half of the above *kārikā* is meant as an illustration of the proposition that रसध्वनि is the soul of a poem. In the *Rāmāyaṇa*, it is the करुण-रस or *tragic emotion* that

---

* Compare : 'तामभ्यगच्छद्रुदितानुसारी मुनिः कुशेध्माहरणाय यातः।
निषाद-विद्धाण्डज-दर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः॥'
—*Raghu*. *XIV*. 70

pervades the whole poem. In the *Fourth Uddyota* of the *Dhvanyāloka* Ānandavardhana states :—

"प्रवन्धे चाङ्गी रस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति। कस्मिन्निवेति चेत्—यथा रामायणे यथा वा महाभारते। रामायणे हि करुणो रसः स्वयमादिकाविना सूत्रितः—'शोकः श्लोकत्वमागतः' इत्येवंवादिना। निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्घमुपरचयता॥—*Op. cit.*, pp. 529-30.

"क्रौञ्चद्वन्द्व....श्लोकत्वमागतः"—The *Rāmāyaṇa* is the outward manifestation and embodiment of the poet's *tragic emotion* (करुण-रस) that was aroused by the pitiful cries of the *Krauñca* bird at the sight of its consort (क्रौञ्ची) being pierced to death by an arrow of the fowler. The term शोकः has to be construed with क्रौञ्च in the compound क्रौञ्चद्वन्द्ववियोगोत्थः and not with आदिकवेः. Abhinavagupta gives reasons for this construction in the following passage :—

"क्रौञ्चस्य द्वन्द्ववियोगेन सहचरी-हननोद्भूतेन साहचर्य-ध्वंसनेन उत्थितो यः शोकः स्थायिभावो निरपेक्षभावत्वात् विप्रलम्भ-शृङ्गारोचित-रतिस्थायिभावाद् अन्य एव। स एव तथाभूतविभाव-तदुत्थाक्रन्दाद्यनुभावचर्वणया हृदय-संवाद-तन्मयीभवनक्रमाद् आस्वाद्यमानतां प्रतिपन्नः करुणरसरूपतां लौकिक-शोक-व्यतिरिक्तां स्वचित्तद्रुतिसमास्वाद्यसारां प्रतिपन्नः रसपरिपूर्णकुम्भोच्चलनवत् चित्तवृत्तिनिःष्यन्दस्वभाव-वाग्विलापादिवच्च समयानपेक्षत्वेऽपि चित्तवृत्तिव्यञ्जकत्वात् इति नयेन अकृतकतयैव आवेशवशात् समुचितशब्दच्छन्दोवृत्तादिनियन्त्रित-श्लोकरूपतां प्राप्तः—

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्च-मिथुनादेकमवधीः काममोहितम्॥' इति।

ननु मुनेः शोक इति मन्तव्यम्। एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत्। न च दुःखसन्तप्तस्यैषा

दशेति। एवं चर्वणोचित-शोक-स्थायिभावात्मक-करुणरस-समुच्चलन-स्वभावत्वात् स एव काव्यस्यात्मा सारभूतस्वभावोऽपरशब्द-वैलक्षण्य-कारकः। एतदेवोक्तं हृदयदर्पणे—'यावत् पूर्णो न चैतेन तावन्नैव वमत्यमुम् ।"—*Op. cit.*, pp. 85-87.

Thus, every true poem is merely the expression of the poet's overflowing emotion and is a medium to transmit this emotion to the readers in succession, and it is because of this that emotions (रस) are truly styled as the soul of poetic composition. This idea has been admirably represented by Abhinavagupta in his scholium known as *Abhinava-Bhāratī* on Bharata's *Nāṭya-S'āstra, VI.* 42 :—

"यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं तथा ।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः ॥"

—The readings of the commentary are extremely corrupt and obscure though the purport thereof is sufficiently clear :—

"बीजं यथा वृक्षमूलत्वेन स्थितं तथा रसास्तन्मूलादिप्रीति (?)—पूर्विका व्युत्पत्तिरिति त(क ?)-तरे च व्याख्यानार्हात् कविगत-साधारणीभूत संविन्मूलश्च काव्य-पुरःसरो नटव्यापारः सैव च संवित् परमार्थतो रसः, सामाजिकस्य च तत्प्रतीत्या वशीकृतस्य पश्चादा-वापोद्धार-बुद्धया विभावादिप्रतीतिरिति प्रयोजने नाट्यं काव्ये सामाजिक-धियि च। एवं मूलबीजस्थानीयात् कविगतो रसः। कविर्हि सामाजिक-तुल्य एव। तत एवोक्तम्—

"श्रृङ्गारी चेत् कविः काव्ये—"इत्याद्यानन्दवर्धनाचायण। ततो वृक्ष-स्थानीयं काव्यम्। तत्र पुष्पादि-स्थानीयोऽभिनयादि-नटव्यापारः। तत्र फलस्थानीयः सामाजिक-रसास्वादः। तेन रसमयमेव विश्वम् ॥"
—*Op. cit.*, Vol. I. p. 295. (GOS. Edn.)

प्रतीयमानस्य च ......प्रधान्यात्—Compare :—

"व्यङ्ग्य-व्यञ्जक-भावेऽस्मिन् विविधे सम्भवत्यपि ।
रसादिमय एकस्मिन् कविः स्यादवधानवान् ॥"

—*Dhvanyāloka*, IV. 5.

Also, 'यतः परिपाकवतां कवीनां रसादितात्पर्यविरहे व्यापार एव न शाभते'—*Dhvanyāloka-Vṛtti*, Uddyota III. p. 497.

TEXT

§ २१ । सरस्वती स्वादु तदर्थवस्तु
निःष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति
परिस्फुरन्तं प्रतिभाविशेषम् ॥६॥

तद् वस्तु-तत्त्वं निःष्यन्दमाना महतां कवीनां भारती अलोक-सामान्यं प्रतिभा-विशेषं परिस्फुरन्तमभिव्यनक्ति । येनास्मिन्नति-विचित्र-कविपरम्परावाहिनि संसारे कालिदास-प्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते ॥

EXPOSITION

§ 21. 'The Goddess of learning herself, out of divine grace, so weaves out the theme overflowing with emotion, the quintessence of poetic art, to devise which no conscious effort is needed on the part of the poet, as to reveal the light of the poet's genius that shines forth with a transcendent halo.' The same thought is repeated in the following *Kārikā* of the *Dhvanyāloka* :—

"प्रतायन्तां वाचो निमित-विविधार्थामित-रसा
न सादः कर्त्तव्यः कविभिरनवद्ये स्वविषये ।
परस्वादानेच्छा-विरत-मनसो वस्तु सुकवेः
सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥"—IV. 17.

—which has been explained in the *Vṛtti* as follows :—

"येषां सुकवीनां प्राक्तन-पुण्याभ्यास-परिपाकवशेन प्रवृत्तिस्तेषां परोपरचितार्थ-निःस्पृहाणां स्व-व्यापारो न क्वचिदुपयुज्यते। सैव भगवती सरस्वती स्वयमभिमतमर्थमाविर्भावयति। एतदेव हि महाकवित्वं महाकवीनाम् ॥"

The production of a great *genius* is marked by spontaneity while that of a *talent* is laboured and forced. Compare Abhinavagupta's comment :—

"निःष्यन्दमानेति। दिव्यमानन्दरसं स्वयमेव प्रस्नुवाना इत्यर्थः।

यदाह भट्टनायकः—

"वाग्धेनुर्दुग्ध एतं हि रसं यद्बालतृष्णया।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥"

तदावेशेन विनाप्याक्रान्त्या हि योगिभिर्दुह्यते। अत एव—

"यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥"

—इत्यनेन साराग्रग्रवस्तुपात्रत्वं हिमवत उक्तम् ॥"—

Op. cit., pp. **91-92**.

Bhaṭṭa-Tauta, in his lost *Kāvya-Kautuka,* has thus defined प्रतिभा and differentiated it from other intellectual functions like प्रज्ञा, मति, स्मृति etc. :—

"स्मृतिर्व्यतीत-विषया मतिरागामिगोचरा।
बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता।
प्रज्ञा नव-नवोन्मेष-शालिनी प्रतिभा मता।
तदनुप्राणना-जीवद्-वर्णनानिपुणः कविः ॥
तस्य कर्म स्मृतं काव्यम्—" इति ॥

Note also *Vyaktiviveka* :—

"रसानुगुण-शब्दार्थ-चिन्ता-स्तिमित-चेतसः।
क्षणं स्वरूप-स्पर्शोत्था प्रज्ञैव प्रतिभा कवेः ॥

सा हि चक्षुर्भगवतस्तृतीयमिति गीयते ।
येन साक्षात् करोत्येष भावांस्त्रैकाल्यवर्त्तिनः ॥''
—*Op. cit.*, II. 117-118.[1]

कालिदास-प्रभृतयो....महाकवय इति गण्यन्ते—It is because of this spark of genius that a few, amidst the great concourse of poets, like Kālidāsa, are styled *mahākavi.* Compare :—

''पुरा कवीनां गणना-प्रसङ्गे कनिष्ठिकाऽधिष्ठित-कालिदासा ।
अद्यापि तत्तुल्य-कवेरभावादनामिका सार्थवती बभूव ॥''

So Also :—

''मुक्तके कवयोऽनन्ताः संघाते कवयः शतम् ।
महाप्रबन्धे तु कविरेको द्वौ यदि वा त्रयः ॥''
—Rājas'ekhara's *Kāvya-Mīmāṁsā.*

द्वित्राः—द्वौ वा त्रयो वा । पञ्चषाः—पञ्च वा षड् वा—Bahuvrihi compounds by the *Sūtra*—'संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये'—*Pāṇini*, II. 2. 25. The समासान्त suffix डच् is added by the rule : 'बहुव्रीहौ संख्येये डजबहुगणात्'—*Pāṇini.* V. 4.73.

TEXT

§ २२। इदं चापरं प्रतीयमानस्यार्थस्य सद्भाव-साधनं प्रमाणम्—

शब्दार्थ-शासन-ज्ञान-मात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थ-तत्त्वज्ञैरेव केवलम् ॥७॥

सोऽर्थो यस्मात् केवलं काव्यार्थ-तत्त्वज्ञैरेव ज्ञायते। यदि च वाच्यरूप एवासावर्थः स्यात् तद्वाच्य-वाचक-रूप-परिज्ञानादेव

[1] Compare : 'तेन खलु पुनः समयेन तं भगवन्तमाविर्भूत-शब्द-ब्रह्म-प्रकाशम् ऋषिमुपसंगम्य भगवान् पद्मयोनिरवोचत्—ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि । तद् ब्रूहि रामचरितम् । अव्याहत-ज्योतिरार्षं ते प्रातिभं चक्षुः । आद्यः कविरसि ॥'—*Uttararāmacarita.* Act II.

तत्प्रतीतिः स्यात्। अथ च वाच्य-वाचक-लक्षणमात्र-कृतश्रमाणां काव्य-तत्त्वार्थ-भावना-विमुखानां स्वर-श्रुत्यादि-लक्षणमिवाप्रगीतानां गान्धर्व-लक्षण-विदामगोचर एवासावर्थः ॥

EXPOSITION

§ 22. The present *kārikā* too supplies another reason why the suggested sense must be held to be distinct from the expressed sense. While the expressed sense of a sentence can be cognised by anybody who is acquainted with the *conventional meaning* (संकेतितार्थ) of the words, it is only the connoisseurs (सहृदय) alone who are able to grasp the suggested sense. Had the suggested sense been identical with the expressed sense, even the lay-men would not have failed to understand it. This is further clarified by an illustration drawn from the science of music (गान्धर्व-विद्या). Just as those un-initiated into the art of music (अप्रगीत) cannot fully appreciate the difference between the various notes and melodies, as propounded *in theory*, in a particular musical performance, howsoever well-versed they might be in the theories of musical science and difinitions of the various elements like स्वर, श्रुति etc. thereof, so is it with the suggested sense.

Mammaṭa in his *Kāvya-Prakās'a* reproduces almost *verbatim* the arguments of the *Dhvanikāra* for positing the existence of the suggested sense, supplementing them with a few more of his own :—

"अपि च वाच्योऽर्थः सर्वान् प्रतिपत्तॄन् प्रत्येकरूप एवेति नियतोऽसौ। नहि 'गतोऽस्तमर्कः' इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति। प्रतीयमानस्तु तत्तत्-प्रकरण-वक्तृ-प्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते। तथा च 'गतोऽस्तमर्कः' इत्यतः सपत्नं प्रत्यवस्कन्दनावसर इति, अभिसरणमुपक्रम्यतामिति, प्राप्तप्रायस्ते प्रेयानिति, कर्म-करणान्निवर्त्तामह

इति, सान्ध्यो विधिरुपक्रम्यतामिति, सन्तापोऽधुना न भवतीति, विक्रेयवस्तूनि संह्रियन्ताम् इति, नागतोऽद्यापि प्रेयान् इत्यादिरनवधिर्व्यङ्ग्योऽर्थः तत्र तत्र प्रतिभाति ।

"वाच्य-व्यङ्ग्ययोर्निःशेषेत्यादौ निषेध-विध्यात्मना, 'मात्सर्यमुत्सार्य विचार्य कार्यम् आर्याः समर्यादमुदाहरन्तु । सेव्या नितम्बाः किमु भूधराणामुत स्मर-स्मेर-विलासिनीनाम् ।।'—इत्यादौ संशय-शान्त-शृङ्गार्यन्यतर-निश्चयरूपेण,

'कथमवनिप ! दर्पो यन्निशातासिधारा-
दलन-गलित-मूर्ध्नां विद्विषां स्वीकृता श्रीः ।
ननु तव निहतारेरप्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः ।।'

—इत्यादौ निन्दास्तुति-वपुषा स्वरूपस्य, पूर्वपश्चाद्भावेन प्रतीतेः कालस्य, शब्दाश्रयत्वेन शब्द-तदेकदेश-तदर्थ-वर्ण-संङ्घटनाश्रयत्वेन चाश्रयस्य, शब्दानुशासनज्ञानेन प्रकरणादिसहायप्रतिभा-नैर्मल्यसहितेन तेन चावगम इति निमित्तस्य, बोद्धृमात्र-विदग्ध-व्यपदेश्ययोः प्रतीतिमात्र-चमत्कृत्योश्च करणात् कार्यस्य, 'गतोऽस्तमर्कः' इत्यादौ प्रदर्शितनयेन संख्यायाः, 'कस्स व ण होइ रोसो'–इत्यादौ सखी-तत्कान्तादिगतत्वेन विषयस्य च भदेऽपि यद्येकत्वं तत् क्वचिदपि नीलपीतादौ भेदो न स्यात् । उक्तं हि—'अयमेव हि भेदो भदहेतुर्वा यद्विरुद्धधर्माध्यासः कारण-भदश्च ।'—इति ।"—*Op. cit.*, Ucchvāsa V.

All these arguments have been summed up by Viśvanātha in the following *kārikā* :—

"बोद्धृ-स्वरूप-संख्या-निमित्त-कार्य-प्रतीतिकालानाम् ।
आश्रय-विषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ।।"

—*Sāhityadarpaṇa*, V. 2

TEXT

§ २३ । एवं वाच्य-व्यतिरेकिणो व्यङ्ग्यस्य सद्भावं प्रतिपाद्य प्राधान्यं तस्यैवेति दर्शयति—

सोऽर्थस्तद्व्यक्ति-सामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥८॥

व्यङ्ग्योऽर्थस्तद्व्यक्ति-सामर्थ्ययोगी शब्दश्च कश्चन, न शब्द-मात्रम् । तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ । व्यङ्ग्य-व्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनां, न वाच्य-वाचक-रचनामात्रेण ॥

EXPOSITION

§ 23. In the preceding section the *Kārikākāra* has endeavoured to show and has finally established the separate existence of the suggested sense. In the present *kārikā* he is going to prove that it is the suggested sense alone that is predominant in a poem.

सोऽथ:....महाकवेः—The prospective *mahākavi* should always select words with an eye to the nature of the suggested sense, and should not rest satisfied with the combination of words that convey no other sense besides their convential meanings. To him the suggested sense alone is *the* sense *par excellence*, and those words alone matter that are capable of suggesting it.

व्यङ्ग्य-व्यञ्जकाभ्यामेव....महाकवीनाम्—Cp.

'मुख्या महाकवि-गिरामलंकृतिभृतामपि ।
प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम् ।।'

—*Dhvanyāloka*, III. 37.

Kuntaka, even though he does not concur with the *Dhvanikāra* in positing the suggested sense as anything different in nature from the expressed sense, is keen enough to note the difference in vocabulary and import of a truly great poem from those in ordinary use. We quote here the following extract from his *Vakroktijīvita* though somewhat long, for the

convenience of readers and we hope it will serve as a commentary on the present *Kārikā* :—

"शब्दो विवक्षितार्थैक-वाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारि-स्वस्पन्दसुन्दरः ॥"

—स शब्दः काव्ये यस्तत्समुचित-समस्तसामग्रीकः। कीदृक्?—विवक्षितार्थैकवाचकः। विवक्षितो योऽसौ वक्तुमिष्टोऽर्थस्तदेकवाचकः, तस्यैकः केवल एव वाचकः। कथम्? अन्येषु सत्स्वपि। अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु। तथा च सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग्वाचकतां न प्रतिपद्यते। यथा—

'कल्लोल-वेल्लित-दृषत्-परुष-प्रहारै
रत्नान्यमूनि मकराकर माऽवमंस्थाः।
किं कौस्तुभेन भवतो विहितो न नाम
याच्ञा-प्रसारितकरः पुरुषोत्तमोऽपि ॥'

—अत्र रत्न-सामान्योत्कर्षाभिधानमुपक्रान्तम्। कौस्तुभेनेति रत्न-विशेषोत्कर्षाभिधानमुपसंहरतीति प्रक्रमोपसंहार-वैषम्यं न शोभातिशयमावहति। न चैतद् वक्तुं शक्यते--यः कश्चित् विशेषे गुणग्राम-गरिमा विद्यते स सर्वः सामान्येऽपि सम्भवत्येवेति। यस्मात्—"वाजि-वारण-लोहानां काष्ठपाषाण-वाससाम्। नारी-पुरुष-तोयानामन्तरं महदन्तरम् ॥"....कवि-विवक्षित-विशेषाभिधान-क्षमत्वमेव वाचकत्व-लक्षणम्; यस्मात् प्रतिभायां तत्कालोल्लिखितेन केनचित् परिस्पन्देन परिस्फुरन्तः पदार्थाः प्रकृत-प्रस्ताव-समुचितेन केनचिदुत्कर्षेण वा समाच्छादित-स्वभावाः सन्तो विवक्षा-विधयत्वेन अभिधेयतापदवीमव-तरन्तः तथाविध-विशेष-प्रतिपादन-समर्थनाभिधानेन अभिधीयमाना-श्चेतन-चमत्कारितामापद्यन्ते ॥

"अर्थश्च वाच्यलक्षणः कीदृशः? काव्ये यः सहृदयाह्लादकारि-स्वस्पन्द-सुन्दरः। सहृदयाः काव्यार्थ-विदस्तेषामाह्लादमानन्दं करोति

यस्तेन स्व-स्पन्देन आत्मीयेन स्वभावेन सुन्दरः। तदेतदुक्तं भवति—यद्यपि पदार्थस्य नानाविध-धर्म-खचितत्वं सम्भवति तथापि तथाविधेन धर्मेण सम्बन्धः समाख्यायते यः सहृदय-हृदयाह्लादमाधातुं क्षमते। तस्य च तदाह्लाद-सामर्थ्यं सम्भाव्यते येन काचिदेव स्वभाव-महत्ता रस-परिपोषाङ्गत्वमेव वा व्यक्तिमासादयति।....यथा च—'तामभ्यगच्छद्रुदितानुसारी'—अत्र कोऽसौ मुनिर्वाल्मीकिरिति पर्याय-पद-मात्रे वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्न-शकुनिसन्दर्शनमात्र-समुत्थितः शोकः श्लोकत्वमभजत यस्येति तस्य तदवस्थजनक-राजपुत्री-सन्दर्शन-विवश-वृत्तरन्तःकरणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदय-हृदयाह्लादकारी कवेरभिप्रेतः।....तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम्। तेन नेयार्थापार्थादयो दूरोत्सारितत्वात् पृथङ् न वक्तव्याः।"—*Op. cit.*, 1.9 and *vṛtti* thereon. It is the inferior poets and literary quacks alone that are absolutely regardless of the choice of words and their imports. As it has been very admirably put in the following *āryā*, cited by Namisādhu, the commentator on Rudraṭa's *Kāvyālaṁkāra*,—

"गणयन्ति नापशब्दं न वृत्तभङ्गं क्षयं न वाऽर्थस्य।
रसिकत्वेनाकुलिता वेश्यापतयः कुकवयश्च॥"

—*Op. cit.*, p. 76. (N.S.P. Edn.)

Thus, by orienting the poet's attention towards the suggested sense and words that are chiefly capable for that end, Ānandavardhana implicitly states the predominance of suggestion in a poetic composition. As Abhinavagupta observes :—

"एवं व्यङ्ग्य-व्यञ्जक-भावस्यापि प्राधान्यमुक्तमिति ध्वनति ध्वन्यते ध्वननमिति त्रितयमप्युपपन्नमित्युक्तम्।"—*Locana*, pp. 98-99.

TEXT

§२४। इदानीं व्यङ्ग्य-व्यञ्जकयोः प्राधान्येऽपि यद् वाच्य-वाचकावेव प्रथममुपाददते कवयस्तदपि युक्तमेवेत्याह—

आलोकार्थी यथा दीप-शिखायां यत्नवाञ् जनः ।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः ॥९॥

यथा हि आलोकार्थी सन्नपि दीप-शिखायां यत्नवान् जनो भवति तदुपायतया। नहि दीपशिखामन्तरेणालोकः सम्भवति। तद्वद् व्यङ्ग्यमर्थं प्रत्यादृतो जनो वाच्येऽर्थे यत्नवान् भवति। अनेन प्रतिपादकस्य कवेर्व्यङ्ग्यमर्थं प्रति व्यापारो दर्शितः ॥

EXPOSITION.

§24. Now, it might be contended that it is the expressed sense that is sought to be conveyed *first* by the poet and it is the denotative (वाचक) words that he uses, and from this precedence of the वाच्यार्थ and preference of वाचक we should rather infer the prominence of the expressed sense than that of the suggested sense. The present *kārikā* is intended as an answer to this possible objection.

Though it is the expressed sense which is intended to be conveyed *first* by the poet, yet that, by no means, establishes its predominance. So is it with the *denotative words* (वाचक-शब्द). The final aim of the poet is to convey the suggested sense. That is the end in view. And to that end he is bound by necessity to use *denotative words* and convey *the primary expressed sense*—which constitute the means. Or in other words, the वाचक words and the वाच्य sense are the उपाय's, while the व्यङ्ग्य sense is the उपेय. And it is fallacious to argue from the precedence of the उपाय (*means*), its predominance over the उपेय (*end*). As the maxim runs :—

"उपादायापि ये हेयास्तानुपायान् प्रचक्षते ।
उपायानां हि कर्तृत्वं नावश्यमवतिष्ठते ॥"

Abhinavagupta thus puts the case :—

"ननु प्रथमोपादीयमानत्वात् वाच्य-वाचक-तद्भावस्यैव प्राधान्य-

मित्याशङ्क्य उपायानामेव प्रथममुपादानं भवति इत्यभिप्रायेण विरुद्धोऽयं प्राधान्ये साध्ये हेतुरिति दर्शयति।"—*Locana.*, p. 99.

This is explained further by means of an illustration in the first half of the *Kārikā*. Thus one, *who is eager to have a sight of the beautiful face of his beloved* (आलोकनमालोकः। वनितावदनारविन्दादिविलोकनम्, as *Locana* explains) in the dark, must have to light a taper first, but on that account, the taper cannot claim superiority to the end in view for which it was intended. Compare :—"यो हि यदर्थमुपादीयते नासौ तमेवोपसर्जनीकरोति इति युक्तं वक्तुम्। यथोदकाद्युपादानार्थमुपात्तो घटादिस्तदेवोदकादि। अन्यथा प्रधानेतरव्यवस्था निर्निबन्धनैव स्यात्। अत एव घटादिरेव प्रतिनिधीयते नोदकादि।"—*Vyaktiviveka*, Chap. I, pp. 15-17 (Chowkhamba Edn.).

अनेन प्रतिपादकस्य....दर्शितः—Thus in the present *Kārikā*, it is shown that from the point of view of the poet, it is the व्यङ्ग्य sense that is predominant and the expressed sense is invariably subordinate to it.

तदादृतः in the *kārikā* is to be explained as तस्मिन् (व्यङ्ग्येऽर्थे) आदृतः (आदरवान्). Cf. "आदृतौ सादरार्चितौ"-इत्यमरः (III. 3.85)—'कर्तृ-कर्मणोः क्तः (आदृतः) इति क्षीरस्वामी। तथा च प्रयोगः—'इति स्म पृच्छत्यनुवेलमादृतः (*Raghu*. III. 5)।'

TEXT

§२५। प्रतिपाद्यस्यापि तं दर्शयितुमाह—

यथा पदार्थ-द्वारेण वाक्यार्थः सम्प्रतीयते।
वाच्यार्थ-पूर्विका तद्वत् प्रतिपत् तस्य वस्तुनः ॥१०॥

यथा हि पदार्थ-द्वारेण वाक्यार्थावगमस्तथा वाच्यार्थ-प्रतीति-पूर्विका व्यङ्ग्यस्यार्थस्य प्रतिपत्तिः ॥

EXPOSITION

§25. From the standpoint of the सहृदय's, too, it is the suggested sense that is prominent and superior to the expressed sense, even though it is the latter that is cognised first. For, just as without first knowing the meanings of particular terms the import of a whole sentence cannot be grasped, so also without first knowing the primary sense of a sentence the suggested sense cannot be cognised. Abhinavagupta adds that though there is, thus, a *sequence* (क्रम) between the cognitions of the वाच्यार्थ and व्यङ्ग्यार्थ, yet that sequence is not perceived by those whose intellectual and aesthetic faculties are too keen, in the same way as the sequence between the cognition of the meanings of the particular words on the one hand and the final cognition of the import of the whole proposition on the other is not noticed by one who is well accustomed with the nature of propositions and judgments. As Abhinavagupta notes :—

"अनेन श्लोकेन अत्यन्तसहृदयो यो न भवति तस्यैष स्फुटसंवेद्य एव क्रमः। यथाऽत्यन्त-शब्द-वृत्तज्ञो यो न भवति तस्य पदार्थ-वाक्यार्थ-क्रमः। काण्ठा-प्राप्त-सहृदय-भावस्य तु वाक्य-वृत्त-कुशलस्येव सन्नपि क्रमोऽभ्यस्तानुमानाविनाभाव-स्मृत्यादिवदसंवेद्य इति दर्शितम्॥"
—*Locana*, p. 100.

TEXT

§२६। इदानीं वाच्यार्थप्रतीति-पूर्वकत्वेऽपि तत्प्रतीते-र्व्यङ्ग्यस्यार्थस्य प्राधान्यं यथा न व्यालुप्यते, तथा दर्शयति —

स्व-सामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्[1]।
यथा व्यापार-निष्पत्तौ पदार्थो न विभाव्यते ॥११॥

1. *Var. lec.* प्रथयन्नपि N.S.P. Edn.

यथा स्वसामर्थ्य-वशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पत्तौ न भाव्यते विभक्ततया ।

तद्वत् सचेतसां सोऽर्थो वाच्यार्थ-विमुखात्मनाम् ।
बुद्धौ तत्त्वार्थ-दर्शिन्यां झटित्येवावभासते ॥१२॥

EXPOSITION

§26. Now it might be argued that since the वाच्यार्थ is cognised *first* by the सहृदय's, it should be ranked superior to व्यङ्ग्यार्थ. This contention is refuted in the present section. The *kārikās* §11-12 must be construed together as they are syntactically interdependent.

The following is the process how we gather the import of a sentence. It is the meanings of individual words unrelated with one another which we first cognise on the basis of the relation called संकेत, and when the individual meanings have been conveyed by the respective terms, it is the function known as तात्पर्य which is *tripartite* in nature, embodying as it does आसत्ति, योग्यता and आकाङ्क्षा, that brings into relation the mutually unrelated concepts and the result is the relational thought-unit better known as a *Judgment* in Western Logic. Compare :—

"पदेभ्यः प्रतिपन्नास्तावदर्थाः आकाङ्क्षा-सन्निधि-योग्यत्ववशेन परस्परमभिसम्बध्यन्ते । योयेनाकाङ्क्षितो यश्च सन्निहितो यश्च सम्बन्धुं योग्यः स तेन सम्बध्यते नातोऽपरः । अत एव 'अङ्गुल्यग्रे हस्ति-यूथशतमास्ते' इति नास्ति सम्बन्धः, योग्यत्वाभावात् ।....तस्माद-भिहितानामेव पदार्थानामन्वयः इति युक्तम् । तदुक्तम्—'पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराण्यथेदानीमर्था अवगता वाक्यार्थं सम्पादयन्ति' इति ॥"—Jayanta Bhaṭṭa's *Nyāya-mañjarī*, Vol. I. p. 365 (Chowkhamba Edn.).

This is known as अभिहितान्वय-वाद—a theory advanced by Kumārila Bhaṭṭa and his followers as an explanation of the mode in which our relational thoughts (संसर्गविगाहि-ज्ञान) arise from propositions. Ānandavardhana seems to have adopted this view of the Bhāṭṭa school inasmuch as he states explicitly that the meanings of individual words are first cognised. The rival theory of the followers of the Prābhākara school is known as अन्विताभिधानवाद.

स्व-सामर्थ्य....विभाव्यते—When the resultant *Judgmental Cognition* (viz. वाक्यार्थ-बोध) has been arrived at through the cognition of *particular concepts* (पदार्थ) mutually brought into relation by virtue of their inherent capacity known as तात्पर्य-शक्ति, consisting of three constituent elements, viz. आकाङ्क्षा, योग्यता and सन्निधि, we are not *separately* aware of the individual concepts any more as they are completely merged in the final judgmental cognition.

स्वसामर्थ्यम्—'आकाङ्क्षा-योग्यता-सन्निधयः'—*Locana*. The word स्व refers to पदार्थः which is the विशेष्य (प्रधान) in the *Kārikā*.

तद्वत्....अवभासते—Similar is the case with the व्यङ्ग्यार्थ too. For, though the सहृदय's cognise the वाच्यार्थ first and then the suggested sense, yet un-satiated as they are by a mere cognition of the expressed sense (वाच्यार्थ), their keen intellect, capable of probing into the every essence of things, lights, in quick succession, upon the suggested sense, which constitutes the very quintessence of poetic art, and is not further aware of the separate existence of the expressed sense. Thus, from the viewpoint of सहृदय's also the suggested sense is all-important and the priority in the cognition of the expressed sense is no ground for attaching to it any superiority.

Now, it might be contended that this statement of the Dhvanikāra is inconsistent with what he says in the *Third Uddyota* of the *Dhvanyāloka*. There it is stated that the relation that subsists between the cognition of the expressed sense and that of the suggested sense is identical with what is found in the case of the *jar and the lamp* (घट-प्रदीप-न्याय), and not one holding good as between the cognition of particular concepts and that of the final judgment (पदार्थ-वाक्यार्थ-न्याय). But, in the present *Kārikā*, the पदार्थ-वाक्यार्थन्याय is cited to illustrate the relation between the वाच्यार्थ and the व्यङ्ग्यार्थ, and not the घट-प्रदीप-न्याय. So the contradiction is quite evident. To this Abhinavagupta replies by observing that it is not the intention of the Dhvanikāra in citing the पदार्थ-वाक्यार्थ-न्याय to rule out completely the cognition of the वाच्यार्थ at the time of the final cognition of the suggested sense, as is the case with पदार्थ and वाक्यार्थ. What is sought to be conveyed thereby is that the cognition of the expressed sense is not completely sublated during that of the suggested sense, just in the same way as the flame of the lamp does not cease to be known even when the cognition of the jar arises :—

"तेनात्र विभक्ततया न भासते, न तु वाच्यस्य सर्वथैवानवभासः। अत एव तृतीयोद्द्योते घटप्रदीप-दृष्टान्त-बलाद् व्यङ्ग्य-प्रतीतिकालेऽपि वाच्य-प्रतीतिर्न विघटते इति यद् वक्ष्यति, तेन सहास्य ग्रन्थस्य न विरोधः।"—*Op. cit.*, p. 102.

It may be asked, however, that if घट-प्रदीप-दृष्टान्त is the proper illustration that clearly explains the nature of the relation as subsisting between the cognitions of वाच्यार्थ and व्यङ्ग्यार्थ, what might have been the motive of the Dhvanikāra for referring to the पदार्थ-वाक्यार्थ-न्याय as an illustration in the

present kārikā ? To this the *Vṛttikāra* gives the following answer in the *Third Uddyota* of the *Dhvanyāloka* :—

"न च पदार्थ-वाक्यार्थ-न्यायो वाच्य-व्यङ्ग्ययोः। यतः पदार्थ-प्रतीतिरसत्यैवेति कैश्चिद् विद्वद्भिरास्थितम्। यैरपि असत्यत्व-मस्या नाभ्युपेयते तैर्वाक्यार्थ-पदार्थयोर्घट-तदुपादानकारणन्यायोऽभ्युप-गन्तव्यः। यथा हि घटे निष्पन्ने तदुपादानकारणानां न पृथगुपलम्भ-स्तथैव वाक्ये तदर्थे वा प्रतीते पद-तदर्थानां तेषां तदा विभक्ततयो-पलम्भे वाक्यार्थ-बुद्धिरेव दूरीभवेत्। न त्वेष वाच्य-व्यङ्ग्ययोर्न्यायः। नहि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति, वाच्यावभासाविना-भावेन तस्य प्रकाशनात्। तस्माद् घट-प्रदीपन्यायस्तयोः। यथैव हि प्रदीप-द्वारेण घटप्रतीतौ उत्पन्नायां न प्रदीप-प्रकाशो निवर्त्तते तद्वत् व्यङ्ग्य-प्रतीतौ वाच्यावभासः[1]। यत्तु प्रथमोद्द्योते—'यथा पदार्थ-द्वारेण—' इत्याद्युक्तम्, तदुपायत्वमात्रात् साम्य-विवक्षया।"—*Dhvanyāloka*, pp. 419-21.

TEXT

§२७। एवं वाच्य-व्यतिरेकिणो व्यङ्ग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत उपयोजयन्नाह—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृत-स्वार्थौ।
व्यङ्क्तः काव्य-विशेषः स ध्वनिरिति सूरिभिः
कथितः॥१३॥

---

1 Compare 'ज्ञान-शब्द-दीपाः त्रयः प्रकाशाः स्व-पर-प्रकाशाः'—cited by Mahimabhaṭṭa in his *Vyaktiviveka*. Also—

"स्व-ज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्॥"—quoted by Viśvanātha in his *Sāhityadarpaṇa* and attributed by him to Dharmakīrtti.

यत्रार्थो वाच्यविशेषः वाचक-विशेषः शब्दो वा तमर्थं व्यङ्क्तः स काव्यविशेषो ध्वनिरिति। अनेन वाच्य-वाचक-चारुत्व-हेतुभ्य उपमादिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्॥

EXPOSITION

§27. Having thus established the separate existence of the suggested sense in the foregoing sections, the Dhvanikāra, in the present *kārikā*, furnishes a definition of *dhvani-kāvya*, where the suggested sense alone is predominant.

यत्रार्थः शब्दो वा....कथितः—'A species of poetry wherein a word suggests a meaning by making its (primary) meaning subordinate to the former, or the primary meaning subordinates itself to the meaning suggested by it, has been called *Dhvani* by scholars."

Abhinavagupta explains the expression उपसर्जनीकृत-स्वार्थ thus : --

"स्व-शब्द आत्मवाची। स्वश्चार्थश्च स्वार्थौ। तौ गुणीकृतौ याभ्याम्। यथासंख्येन। तेनार्थो गुणीकृतात्मा, शब्दो गुणीकृताभिधेयः।"—*Op. cit.*, p. 103. Thus in the अविवक्षित-वाच्य category of suggestion based upon लक्षणा or *Indication*, it is the words (शब्द) that principally give rise to the cognition of the suggested sense, while in the विवक्षितान्यपरवाच्य variety of suggestion it is the expressed sense (अर्थ) that is mainly suggestive. In determining whether शब्द or अर्थ is the main factor we have to resort to the *Joint Method of Agreement and Difference* or अन्वय-व्यतिरेक. Thus if the suggested sense is absent when a particular word is altered, it becomes evident that it was caused by that word and it is a case of शब्दशक्तिमूल-ध्वनि. So also with अर्थ. Thus Mammaṭa lays down the very convenient maxim : 'इह दोष-गुणालंकाराणां शब्दार्थ-गतत्वेन यो

विभागः सोऽन्वय-व्यतिरेकाभ्यामेवावतिष्ठते'—*Kāvyaprakās'a.* *IX*, which must be extended in the case of *Dhvani* and *Guṇībhūta-vyaṅgya* as well.

Now, an objection has been raised by Bhaṭṭanāyaka that if शब्द and अर्थ be *severally* and *independently* taken to be suggestive (as it seems to be hinted at by the disjunctive particle *vā* in the above *kārikā*), we should expect व्यनक्ति instead of व्यङ्क्तः. To this Abhinavagupta answers by saying that in the case of शाब्दी व्यञ्जना, अर्थ is not at all insignificant, for had it been so, a word, of which the primary meaning is not known, might have suggested anything and everything. So अर्थ too has its share in the case of शाब्दी व्यञ्जना, though it is the verbal factor that is predominant there. Similarly, in the case of आर्थी व्यञ्जना, शब्द too has its rôle to play, though a subordinate one. Thus, the Dhvanikāra by using the dual form व्यङ्क्तः hints that शब्द and अर्थ conjointly are requisites in every case of suggestion, whether it be शाब्दी or आर्थी—a designation that is based upon a consideration of prominence of either of these two elements, which again has to be determined by a process of अन्वय-व्यतिरेक, as has been pointed out already.[1] As Abhinavagupta observes :—

"व्यङ्क्त इति द्विवचनेनेदमाह—यद्यप्यविवक्षित-वाच्ये शब्द एव व्यञ्जकस्तथापि अर्थस्यापि सहकारिता न त्रुटचति, अन्यथा अज्ञातार्थोऽपि शब्दस्तद्व्यञ्जकः स्यात् । विवक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव, विशिष्टशब्दाभिधेयतया विना तस्यार्थस्या-

---

1 Cf. 'परिवृत्तिसहत्व-तदभावाभ्यां तु शब्दाप्राधान्यमर्थप्राधान्यं विपरीतं च इत्येतावान् विशेष इति भावः'—Vaidyanātha's *Prabhā* on Govinda Ṭhakkura's *Pradīpa* under *Kāvyaprakās'a*, III. 3 (N.S.P. Edn.).

व्यञ्जकत्वादिति सर्वत्र शब्दार्थयोरुभयोरपि ध्वननं व्यापारः। तेन यद् भट्टनायकेन द्विवचनं दूषितं तद् गजनिमीलिकयैव । 'अर्थः शब्दो वा'—इति विकल्पाभिधानं तु प्राधान्याभिप्रायेण ।"—*Locana*, p. 104. *Vide* also *Kāvyaprakās'a*, II. 15 ; III. 3.[1]

अनेन....दर्शितम्– Thus this definition serves to differentiate the field of *dhvani* from that of the figures of speech like अनुप्रास, उपमा etc. that merely adorn the words and senses and as such are subordinate to them, while in a *dhvani-kāvya* it is the suggested sense that is predominant. So it is not possible to include *Dhvani* within the purview of the prevalent *alaṁkāras*. That the figures of speech become significant only when they are made subordinate to शब्द and अर्थ that constitute the body of poetry has been admirably stated by Pratīhārendurāja in his commentary on Ubhaṭa's *Kāvyālaṁkāra-sārasaṁgraha*—"अलंकारस्य खलु अलंकार्य-परतन्त्रतया निरूपणे क्रियमाणे सुष्ठु स्वरूपं निरूपितं भवति । स्वात्मनि अवस्थितस्य तस्यानलंकारत्वात्, समुद्गकस्थित-हार-केयूर-पारिहार्याद्यलंकारवत् । अतः पुनरुक्तवदाभासत्वस्य अलंकारताख्यापनाय काव्य-परतन्त्रतया निर्देशो

---

1 Mahimabhaṭṭa, however, does not regard this defence of Abhinavagupta satisfactory and upholds Bhaṭṭanāyaka's criticism : "अत्र केचिद् विद्वन्मानिनो द्विवचन-समर्थना-मनोरथाक्षिप्त-चित्ततया वाच्यवाचकयोर्विस्मृत-सुप्रसिद्ध-प्रतीतिक्रमभावांस्तयोरेककालिकतां शब्दस्योक्त-नयनिरस्तामपि व्यञ्जकतां पश्यन्तस्तन्निबन्धनां ध्वनिभेदयोरविवक्षितवाच्य-विवक्षितान्यपरवाच्ययोर्ध्वननव्यापारं प्रति पर्यायेण अन्योन्य-सहकारितां, तदपेक्षां चानयोः प्रधानेतरतामुपकल्प्य सहकारितया व्यक्ति-क्रियां प्रत्युभयोरपि कर्तृत्वात् तदपेक्षो 'व्यङ्क्तः' इति द्विवचन-निर्देशः, प्राधान्यापेक्षश्च—'यत्रार्थः शब्दो वेति' विकल्प इति मन्यमाना 'व्यङ्क्त इति द्विवचनेनेदमाह....अर्थः शब्दो वेति विकल्पाभिधानं तु प्राधान्याभिप्रायेण' इति यदाहुः, तद् भ्रान्तिमूलं न तत्त्वमित्यलमवस्तु-निर्बन्धेन"—*Vyaktiviveka*, pp. 90-91.

युक्त एव ।।"—*Op. cit.*, p. 2. (*Bombay Sanskrit Series* Edn.). What more, the *alaṁkāras* are solely dependent on वाच्य and वाचक and as such on अभिधा, while the ध्वनि is conveyed through the power of suggestion, and as such they are mutually exclusive. As Abhinavagupta observes :—

"गुणालंकाराणां वाच्य-वाचक-भाव-प्राणत्वात्, अस्य च तदन्य-व्यङ्ग्य-व्यञ्जक-भाव-सारत्वात् नास्य तेष्वन्तर्भावः ।"—*Locana*, p. 106.

TEXT

§२८। यदप्युक्तम्—'प्रसिद्ध-प्रस्थानातिक्रमिणो मार्गस्य काव्यत्व-हानेर्ध्वनिर्नास्ती'ति, तदप्ययुक्तम्। यतो लक्षण-कृतामेव स केवलं न प्रसिद्धः, लक्ष्ये तु परीक्ष्यमाणे स एव सहृदय-हृदयाह्लादकारि काव्यतत्त्वम्। ततोऽन्यच्चित्रमेवेत्यग्रे दर्शयिष्यामः ॥

EXPOSITION

§28. यदप्युक्तम्—'प्रसिद्ध-प्रस्थानातिक्रमिणः.... नास्ती'ति—The *Dhvanikāra* here refers to the *second* sub-variety of the thesis of the *Abhāvavādins* (Negativists), who deny the separate existence of the element of *Dhvani* on the ground that the definition of *Dhvani-kāvya* does not accord with the time-honoured and accepted definitions of *kāvya* as furnished by the teachers belonging to such well-known schools of Poetics (प्रसिद्ध-प्रस्थान) as the *Alaṁkāra*, *Rīti*, *Vṛtti*, and *Guṇa*, and as such a *Dhvani-kāvya* is nothing but a figment of imagination on the part of the Dhvani-theorists alone, and has no correspondence in the actual field of poetic art. *Vide* notes on Sec. §4.

To this Ānandavardhana rejoins : तदप्ययुक्तम्...... दर्शयिष्यामः—*Dhvani* is not merely a chimera residing in the brains of the the Dhvani-theorists who endeavour to furnish

a suitable definition of it (लक्षणकृताम्), having no actual counterpart in literary compositions, but, if a thorough and minute investigation is made of all the great poetic products of acknowledged repute (like the *Rāmāyaṇa*, the *Mahābhārata* etc.) it will be found that the suggestion (ध्वनि) pervades them all entering therein *either* as a principal element, when it is called ध्वनि, *or* as a subordinate factor, when it is known as गुणीभूतव्यङ्ग्य. But no poetic art worth the name can afford to go without this essential element (काव्यतत्त्व) which alone causes the delight of true connoisseurs of poetry (सहृदय-हृदयाह्लाद-कारि). Any literary composition, that is not touched by this essential element of suggestion, however abounding in other poetic devices like अलंकार, रीति, वृत्ति etc. it might be, can never be truly regarded as a specimen of poetic art, but can be looked upon as a specimen of literary craftsmanship which can at best cause our admiration and wonder. Ānandavardhana terms it as चित्रकाव्य (शब्दचित्र and वाच्यचित्र) in the *Third Uddyota* of the *Dhvanyāloka* :—

'प्रधान-गुण-भावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यद् यत् तच्चित्रमभिधीयते ॥'—

Dhvanyāloka, III. 41

So also :—

"रसभावादिविषय-विवक्षा-विरहे सति ।
अलङ्कार-निबन्धो यः स चित्र-विषयो मतः ॥
रसादिषु विवक्षा तु स्यात् तात्पर्यवती यदा ।
तदा नास्त्येव तत् काव्यं ध्वनेर्यत्र न गोचरः ॥"—

Cited in the *Vṛtti* on Dh. III. 41

As regards the existence of ध्वनि as a well-established and essential element of poetry in reputed poetic compositions of highest merit even before the advent of the Dhvani-theorists

vide Ānandavardhana's observations on the suggestiveness of the *Rāmāyāṇa* and the *Mahābhārata* in *Dhvanyāloka*, IV. 5 and *Vṛtti* thereon.

TEXT

§ २९। यदप्युक्तम्—'कामनीयकमनतिवर्त्तमानस्य तस्योक्तालंकारादि-प्रकारेषु अन्तर्भाव'—इति, तदप्यसमीचीनम्। वाच्य-वाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्य-व्यञ्जक-समाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः। वाच्य-वाचक-चारुत्व-हेतवो हि तस्याङ्गभूताः, स त्वङ्गिरूप एवेति प्रतिपादयिष्यमाणत्वात्। परिकर-श्लोकश्चात्र—

'व्यङ्ग्य-व्यञ्जक-सम्बन्ध-निबन्धनतया ध्वनेः।
वाच्य-वाचक-चारुत्व-हेत्वन्तःपातिता कुतः॥'

EXPOSITION

§ 29. The *Vṛttikāra* here refers to the third sub-contention of the अभाव-वादिन्'s, who try to comprehend ध्वनि under the different अलंकार's (Vide §5).

वाच्य-वाचक..........कथमन्तर्भावः—The अलंकार's like अनुप्रास and उपमा etc. that enhance the beauty of शब्द and अर्थ respectively are entirely dependent on the latter and as such subordinate to them, as has been amply shown in the foregoing sections. But the *dhvani* has nothing to do with *denotation* and can be communicated solely through व्यञ्जना or Suggestion as will be shown later. So how can the latter be equated with or subsumed under the former, i.e. अलंकार's based upon denotation ?

वाच्य-वाचक-चारुत्व........प्रतिपादयिष्यमाणत्वात्—What more, in a ध्वनिकाव्य the अलंकार's like अनुप्रास and उपमा are always subservient to the suggested sense, which is the

soul (अङ्गिरूप) of poetry. And it is not sane to identify अङ्ग with अङ्गिन्, the soul with the ornaments belonging to the body. For, though the अलंकार's seem *prima facie* to adorn the limbs, in the last analysis it is the soul that is truly adorned. As Abhinavagupta observes in his gloss on the *Vṛtti* on *Dhvanyāloka*, II. 5 :—

"एतदुक्तं भवति—उपमया यद्यपि वाच्योऽर्थोऽलङ्क्रियते, तथापि तस्य तदेवालंकरणं यद् व्यङ्ग्यार्थाभिव्यञ्जन-सामर्थ्याधानम् इति वस्तुतो ध्वन्यात्मैवालंकार्यः। कटक-केयूरादिभिरपि हि शरीर-समवायिभिश्चेतन आत्मैव तत्तच्चित्तवृत्ति-विशेषौचित्य-सूचनात्मतयाऽलङ्क्रियते। तथाहि—अचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति, अलङ्कार्यस्याभावात्। यति-शरीरं कटकादि-युक्तं हास्यावहं भवति, अलङ्कार्यस्यानौचित्यात्। नहि देहस्य किञ्चिदनौचित्यम् इति वस्तुत आत्मैवालंकार्यः, अहमलंकृत इत्यभिमानात्।"—*Locana*, pp. 197-98.

Compare *Ekāvalī* : 'गुणेषु न तावद् ध्वनेरन्तर्भावः। नाप्यलंकारेषु। वाच्यमात्र-विश्रान्तेषु श्लेषादिषु व्यभिचारात्।........ किंचैवमन्तर्भावाभिधानं न संगच्छते। रसादीनाम् आत्मत्वेन प्रतिपन्नानामलंकारत्व-शङ्काया दूरनिरस्तत्वात्। किं च ध्वनिर्गुणालंकारेभ्यो न व्यतिरिच्यते चारुत्व-हेतुत्वाद् इति यद् भवद्भिरभ्यधायि तदपि दुरभिधानम्। ध्वनेर्ध्वन्यात्मतया, चारुत्वहेतुत्वादिति हेतोः सिद्धि-पद्धत्यनध्यासः। एवं त्रिविधस्यापि ध्वनेरलंकारत्वं तावत् प्रत्यादिष्टम्।'—*Op. cit.*, pp. 29-31. Rūyyaka, too, in his *Alaṁkāra-sarvasva* observes :—

"तस्माद्विषय एव व्यङ्ग्य-नामा जीवितत्वेन वक्तव्यः। यस्य गुणालंकार-कृत-परिग्रह-साम्राज्यम्। रसादयस्तु जीवितभूता नालंकारत्वेन वाच्याः। अलंकाराणामुपस्कारकत्वात् रसादीनां च प्राधान्येन उपस्कार्यत्वात्।"—on which Jayaratha comments :—

"गुणानां 'ये रसस्याङ्गिनो धर्माः'—इत्यादि-नीत्या साक्षादेव तद्धर्मत्वात्। अलंकाराणामपि 'उपस्कुर्वन्ति तं सन्तम्—'इत्यादि-नीत्या शब्दार्थ-लक्षणाङ्गातिशय-द्वारेण तदुपस्कारकत्वात्। अलंकाराणां च रसादिरूप व्यङ्ग्यम् अर्थमलंकुर्वतां मुख्यया वृत्त्या अलंकारत्वम्। अलंकार्य-सद्भाव-निबन्धनत्वात् तस्य। रसाद्यात्मन एव च व्यङ्ग्यस्य अलंकार्यत्वेन प्रतिष्ठानात्। अत एव च यत्र स्फुट-व्यङ्ग्यार्थ-रहितत्वं तत्र 'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता'—इत्यादि-नीत्या शब्दार्थमात्र-निबन्धनत्वेन उक्ति-वैचित्र्यमात्र-पर्यवसायित्वादेषां गौणमलंकारत्वम्। यदभिप्रायेणैव च चित्राख्य-काव्यभेद-प्रकारत्वमलंकाराणां निरूपयिष्यते। अत एव अनुप्रासादयोऽलंकाराश्चित्रमित्याद्यन्यैरुक्तम्। स च प्रतीयमानो यद्यपि वस्त्वलंकार-रसत्वेन त्रिविधस्तथापि तेन विना काव्यात्मत्वाभावात् मुख्यत्वेन रसस्यैव आत्मत्वं युक्तम्।"—*Op. cit.*, p. 11.

प्रतिपादयिष्यमाणत्वात्—'To be shown later', referring to *Dhvanyāloka*, II. 4 *et seq.* परिकर-श्लोक—a verse that supplements the arguments embodied in the *kārikā* proper. As Abhinavagupta explains :—"परिकरार्थं कारिकार्थस्य अधिकावापं कर्तुं श्लोकः परिकर-श्लोकः"—*Locana*, p. 107.

TEXT

§ ३०। ननु यत्र प्रतीयमानार्थस्य वैशद्येनाप्रतीतिः स नाम मा भूद् ध्वनेर्विषयः। यत्र तु प्रतीतिरस्ति, यथा—समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्ति-पर्यायोक्तापह्नुति-दीपक-सङ्करालङ्कारादौ तत्र ध्वनेरन्तर्भावो भविष्यतीत्यादि निराकर्त्तुमभिहितम्—'उपसर्जनीकृत-स्वार्थौ' इति। अर्थो गुणीकृतात्मा, गुणीकृताभिधेयश्च शब्दो वा यत्रार्थान्तरमभिव्यनक्ति स ध्वनिरिति। तेषु कथं

तस्यान्तर्भावः ? व्यङ्ग्य-प्राधान्ये हि ध्वनिः। न चैतत् समासोक्त्यादिष्वस्ति ॥

EXPOSITION

§ 30. Now, the opponents might argue that the element of ध्वनि is no innovation on the part of the Dhvani-theorists, for though Bhāmaha, Udbhaṭa and other ancients did not mention ध्वनि or गुणीभूतव्यङ्ग्य *totidem verbis*, that is no proof as to their ignorance of it. For they have indirectly comprehended them under such figures of speech as समासोक्ति, आक्षेप, विशेषोक्ति, पर्यायोक्त, अपह्नुति, दीपक, संकर etc. in each of which there is an apprehension of suggested sense (प्रतीयमानार्थ). Compare :—

"इह हि तावद् भामहोद्भट-प्रभृतयश्चिरन्तनालंकारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतयाऽलंकारपक्ष-निक्षिप्तं मन्यन्ते। तथाहि— पर्यायोक्ताप्रस्तुतप्रशंसा-समासोक्त्याक्षेप-व्याजस्तुत्युपमेयोपमाऽनन्वयादौ वस्तुमात्रं गम्यमानं वाच्योपस्कारकत्वेन 'स्व-सिद्धये पराक्षेपः परार्थं स्व-समर्पणम्' इति यथायोगं द्विविधया भङ्ग्या प्रतिपादितं तैः। रुद्रटेन तु भावालंकारो द्विधैवोक्तः। रूपक-दीपकापह्नुति-तुल्ययोगितादौ उपमाद्यलंकारो वाच्योपस्कारकत्वेनोक्तः। उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता। रसवत्-प्रेयःप्रभृतौ तु रसभावादिर्वाच्यशोभाहेतुत्वेनोक्तः। तदित्थं त्रिविधमपि प्रतीयमानमलंकारतया स्थापितमेव।"—Rūyyaka's *Alaṁkāra-sarvasva*, pp. 3-6. Jagannātha, too, in his *Rasagaṅgādhara* observes :—

"इदं तु बोध्यम्—ध्वनिकारात् प्राचीनैर्भामहोद्भटप्रभृतिभिः स्व-ग्रन्थेषु कुत्रापि ध्वनि-गुणीभूतव्यङ्ग्यादिशब्दा न प्रयुक्ता इत्येतावतैव तैर्ध्वन्यादयो न स्वीक्रियन्ते—इत्याधुनिकानां वाचोयुक्तिरयुक्तैव। यतः समासोक्ति-व्याजस्तुत्यप्रस्तुतप्रशंसाद्यलंकार-निरूपणेन कियन्तोऽपि गुणीभूतव्यङ्ग्यभेदास्तैरपि निरूपिताः। अपरश्च सर्वोऽपि

व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः।[1] नहि अनुभवसिद्धोऽर्थो बालेनाप्यपह्नोतुं शक्यते। ध्वन्यादिशब्दैः परं व्यवहारो न कृतः। न ह्येतावताऽनङ्गीकारो भवति। प्राधान्याद् अलंकार्यो हि ध्वनिरलंकारस्य पर्यायोक्तस्य कुक्षौ कथंकारं निविशताम् इति तु विचारान्तरम् ॥"—*Op. cit.*, pp. 554-55 (NSP. Edn.)

It is worth while to quote the following extract from Pratīhārendurāja's commentary on Udbhaṭa's work, as it fully elucidates the position of the followers of Udbhaṭa's school *vis-à-vis* Ānandavardhana's tenet :—

"ननु यत्र काव्ये सहृदय-हृदयाह्लादिनः प्रधानभूतस्य स्व-शब्द-व्यापारास्पृष्टत्वेन प्रतीयमानैकरूपस्य अर्थस्य सद्भावस्तत्र तथाविधार्थाभिव्यक्तिहेतुः काव्यजीवितभूतः कैश्चित् सहृदयैर्ध्वनिर्नाम व्यञ्जकत्वभेदात्मा काव्यधर्मोऽभिहितः, स कस्मादिह नोपदिष्टः। उच्यते। एतेषु अलंकारेष्वन्तर्भावात्। तथाहि—प्रतीयमानैकरूपस्य वस्तुनस्त्रैविध्यं तैरुक्तं वस्तुमात्रालंकार-रसादिभेदेन। (१) तत्र वस्तुमात्रं तावत् प्रतीयते। यथा—'चक्राभिघाते'ति। अत्र हि राहुवधूरतोत्सवस्य या चुम्बनमात्रशेषता तत्कर्मिका चक्राभिघातप्रसभाज्ञाकरणिका चकारेतिकरणलक्षणा क्रियाऽभिधीयते। सा चैवंविधा कार्यभूतत्वात् कारणमन्तरेणानुपपद्यमाना तथाविध-वैरस्यकारि-राहुशिरश्छेदनलक्षणं कारणं नालंकाररूपं नापि रसादिरूपम्, अपि तु वस्तुमात्ररूपं कल्पयति। अतोऽत्र वस्तुमात्रस्यैवंविधस्य शब्द-

1 Compare : "यत्र खलु वाच्य-विवक्षापूर्वकत्वेनार्थान्तरं प्रतीयते 'चक्राभिघाते'-त्यादौ तत्र पर्यायोक्त-भेदता पर्यायोक्त-लक्षणस्याप्रस्तुतप्रशंसा-लक्षणविचारवशेन तद्व्यतिरिक्तविषयावगाहित्वात्। यत्र तु अविवक्षिते वाच्येऽर्थान्तरस्य प्रतीतिस्तत्राप्रस्तुतप्रशंसा। अतश्च पर्यायोक्ताप्रस्तुप्रशंसयोरेव यथाक्रमं विवक्षिताविवक्षित-वाच्ययोः सर्वध्वनिभेदसामान्यभूतयोः ध्वनिभेदयोरन्तर्गतिर्वाच्या"—Pratīhārendurāja's *Laghuvṛtti* on Udbhaṭa's *Kāvyālaṁkāra-Sāra-Saṁgraha*, p. 91.

व्यापारास्पृष्टस्य प्रतीयमानता। तद्विषयस्य च काव्यधर्मस्य ध्वन-नाभिधानस्य वाच्य-वाचकव्यापारशून्यावगमनस्वभावत्वात् पर्यायो-क्तालंकारसंस्पर्शित्वम् । तदुक्तं—'पर्यायोक्तं यदन्येन'—इत्यादि।

"ननु पर्यायोक्त-शब्देन प्रकारान्तरेण उच्यमानत्वात् प्रतीयमानं वस्तु अभिधीयते। तच्चेह प्रतीयमानं प्रधानत्वाद् अलंकार्यतया वक्तुं युक्तं न त्वलंकृति-करणतया। अतः कथं तस्यालंकार-व्यपदेशः? उच्यते—प्रधानमपि गुणानां सौन्दर्यहेतुत्वादलंकृतौ साधनत्वं भजति। दृश्यते हि लोके व्यपदेशः स्वाम्यलंकरणका भृत्या इति। अतोऽत्रापि प्रतीयमानस्य सत्यपि प्रधानत्वे स्वगुणभूतवाच्य-सौन्दर्य-साधकतमत्वाद् अलंकारव्यपदेशो न विरुध्यते। यदि वा भगवद्-वासुदेव-वर्त्तितया योऽसौ वीररसोऽवगम्यते तदपेक्षया तस्य मुख्ययैव वृत्त्या गुणभूतत्वाद् अलंकारता। एवमुत्तरत्रापि यथासंभवं योज्यम्।....(२) अलंकाराणां तु यद्यपि—'लावण्य-कान्ति-परिपूरिते'-त्यादौ प्रयीयमानैकरूपता, तथापि अनन्तरोक्तलक्षणेषु अलंकारेषु अनुप्रवेशो भविष्यति पर्यायोक्ते वा।........न च यस्यालंकारस्य प्रतीयमानरूपता तस्येहालंकारत्वं केनचिन्निवारितम् इति प्रतीयमानरूपतया रूपकाख्योऽलंकारो भविष्यति।....(३) रस-भाव-तदाभास-तत्प्रशमानां तु प्रतीयमानतायाम् उदाहरणम्—'याते गोत्र-विपर्यये'-इति।....अतोऽत्र संभोगश्रृङ्गारस्येर्ष्याविप्रलम्भतिरोधानहेतोः प्रतीयमानता। तत्र च पूर्वं रसवत्त्वलक्षणोऽलंकारः प्रतिपादितो 'रसवद् दर्शित—' इत्यादिना।....यत्रापि भावास्तथा रस-भावाभासा रस-भाव-तदाभास-प्रशमाश्च प्रतीयमानास्तत्रापि यथाक्रमं प्रेयस्व-दूर्जस्वि-समाहित-लक्षणालंकारयोगो वाच्यः। एवमेतत् प्रधानभूतेषु रसादिषूक्तम्। गुणभूतेष्वपि च रसेषूदात्तालंकारः प्रतिपादितः 'चरितं च महात्मना'-मित्यादिना। अतश्च रसादिष्वभिव्यञ्जकत्वस्य नार्थान्तरता॥"—*Op. cit.*, pp. 85-89.

To controvert this view of the ancient Ālaṁkārikas like

Bhāmaha, Udbhaṭa and others the *Dhvanikāra* has employed the adjunct उपसर्जनीकृत-स्वार्थौ. True, that in the figures of speech above noted there is the cognition of the suggested sense—viz. वस्तु, अलंकार, रस etc., but it is subordinate to the expressed sense, and as such they cannot be regarded as cases of *Dhvani* where the suggested sense alone is predominant. They can, however, be legitimately reckoned as instances of गुणीभूत-व्यङ्ग्य. Thus, it comes up to this that the ancient theorists were inconsistent inasmuch as they confounded ध्वनि which is always *adorned* (अलंकार्य) with *instruments af adornment* (अलंकार) like पर्यायोक्त, समासोक्ति etc., though the other type of poetry, viz. गुणीभूत-व्यङ्ग्य, could be consistently subsumed under them. As Jagannātha has noted—'प्राधान्यादलंकार्यो हि ध्वनिरलंकारस्य पर्यायोक्तस्य कुक्षौ कथंकारं निविशताम् इति तु विचारान्तरम्'. That *alaṁkāras* like समासोक्ति, दीपक, रूपक etc. though they are commonly classed as चित्रकाव्य, can as well be regarded as types of गुणीभूत-व्यङ्ग्य, has been explicitly stated by Ānandavardhana under *Dhvanyāloka*, III. 36 :—

'येषु चालंकारेषु सादृश्यमुखेन तत्त्व-प्रतिलम्भः, यथा रूपकोपमा-तुल्ययोगिता-निदर्शनादिषु, तेषु गम्यमान-धर्म-मुखेनैव यत् सादृश्यं तदेव शोभातिशयशालि भवतीति ते सर्वेऽपि चारुत्वातिशययोगिनः सन्तो गुणीभूत-व्यङ्ग्यस्यैव विषयाः। समासोक्त्याक्षेपपर्यायोक्तादिषु तु गम्यमानांशाविनाभावेनैव तत्त्व-व्यवस्थानात् गुणीभूत-व्यङ्ग्यता निर्विवादैव। तत्र च गुणीभूत-व्यङ्ग्यतायामलंकाराणां केषाञ्चित् अलंकारविशेष-गर्भतायां नियमः। यथा व्याजस्तुतेः प्रेयोऽलंकार-गर्भत्वे। केषाञ्चिदलंकाराणां परस्पर-गर्भताऽपि संभवति। यथा दीपकोपमयोः। तत्र दीपकमुपमा-गर्भत्वेन प्रसिद्धम्। उपमाऽपि कदाचिद् दीपक-च्छायानुयायिनी। यथा मालोपमा। तथाहि। 'प्रभामहत्या शिखयेव दीपः'—इत्यादौ

स्फुटैव दीपक-च्छाया लक्ष्यते। तदेवं व्यङ्ग्यांश-संस्पर्शे सति चारुत्वातिशययोगिनो रूपकादयोऽलंकाराः सर्व एव गुणीभूत-व्यङ्ग्यस्य मार्गः ॥'—*Op. cit.*, pp. 470-472.

So Jagannātha is justified in criticising the views of some of the scholiasts, who view चित्रकाव्य and गुणीभूत-व्यङ्ग्य-काव्य as mutually exclusive in their scopes :—

"यत्तु 'अतादृशि गुणीभूत-व्यङ्ग्यम्—' इत्यादिकाव्यप्रकाशगत-लक्षणे चित्रान्यत्वं टीकाकारैर्दत्तम्, तन्न। पर्यायोक्त-समासोक्त्या-दिप्रधानकाव्येषु अव्याप्त्यापत्तेः। तेषां गुणीभूत-व्यङ्ग्यतायाश्चित्र-तायाश्च सर्वालंकारिक-सम्मतत्वात्।"—*Op. cit.*, p. 20.

We should note, however, that Mahimabhaṭṭa in his *Vyakti-viveka*, criticises the classification of *Kāvya* into ध्वनि and गुणीभूत-व्यङ्ग्य, as adopted by the *Dhvanikāra* and opines that there is no real or essential difference between the one and the other save one of degree, which cannot be taken as a ground for classification :—

"किंच काव्यस्य स्वरूपं व्युत्पादयितुकामेन मतिमता तल्लक्षण-मेव सामान्येन आख्यातव्यम्, यत्र वाच्य-प्रतीयमानयोर्गम्य-गमक-भाव-संस्पर्शस्तत् काव्यम् इति। तावतैव व्युत्पत्तिसिद्धेः। यत्तु तदनाख्यायैव तयोः प्रधानेतरभाव-कल्पनेन प्रकारद्वयमुक्तम् तद-प्रयोजकमेव। यो हि यद्विशेष-प्रतीतौ निमित्तभावेन निश्चितः स एव तदर्थिनः प्रतिपाद्यो भवति नान्यः, अतिप्रसङ्गात्। यथा दण्डि-प्रतीतौ दण्डः। अनुमेयार्थ-संस्पर्शमात्रं च अन्वय-व्यतिरेकाभ्यां काव्यस्य चारुत्वहेतुर्निश्चितम्। अतस्तदेव वक्तव्यम् भवति, न तस्य प्राधान्याप्राधान्यकृतो विशेषः। न हि तयोः सामान्य-विशेषयो-स्त्रिष्वपि वस्तुमात्रादिष्वनुमेयेषु चेतनचमत्कारी कश्चिद् विशेषोऽव-गम्यते।... तदेवं प्रकारत्रयेऽपि अनुमेयार्थसंस्पर्श एव काव्यस्य चारुत्वहेतुरित्यवगन्तव्यम्। यदाह ध्वनिकारः—'सर्वथा नास्त्येव

हृदय-हारिणः काव्यस्य स प्रकारः, यत्र प्रतीयमानार्थ-संस्पर्शेन न सौभाग्यम्।' तदिदं काव्य-रहस्यम् परममिति सूरिभिर्विभाव-नीयम् ।।''—*Op. cit.*, pp. 136-141.[1]

TEXT

§ ३१। समासोक्तौ तावत्—

उपोढरागेण विलोल-तारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥

—इत्यादौ व्यङ्ग्यनानुगतं वाच्यमेव प्राधान्येन प्रतीयते, समारोपित-नायिका-नायक-व्यवहारयोर्निशा-शशिनोरेव वाक्यार्थत्वात्॥

EXPOSITION

§ 31. The definition of समासोक्ति is as follows :—

"समासोक्तिः समैर्यत्र कार्य-लिङ्ग-विशेषणैः।
व्यवहार-समारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।"

—*Sāhityadarpaṇa*, x. 56^{b}-57^{a}

Here the adjective qualifying शशिना, viz. उपोढरागेण, can as well apply to a lover. Moreover, the words like निशामुखम्, विलोलतारकम्, तिमिरांशुकम्, रागात् are all *paronomastic* (श्लिष्ट). Hence *the behaviour of a lover* (नायक-व्यवहार) is conveyed through suggestion though not expresssed. But the suggested sense is not prominent here. It is the expressed sense, viz. the description of the moon in the dusk of the evening, that is the final import. The moon is presented to us with the behaviour of a lover super-imposed on it. Abhinavagupta thus explains the above verse :—

---

1 Compare—"तत्रार्थचित्र-शब्दचित्रयोरविशेषेणाधमत्वमयुक्तं वक्तुम्। तारतम्यस्य स्फुटमुपलब्धेः।.... सत्यपि तारतम्ये यद्येकभेदत्वं कस्तर्हि ध्वनि-गुणीभतव्यङ्ग्ययोरीषदन्तरयोर्विभिन्नभेदत्वे दुराग्रहः।"

—*Rasagaṅgādhara*, p. 24.

"उपोढो रागः सान्ध्योऽरुणिमा प्रेम च येन। विलोलास्तारका ज्योतींषि नेत्रत्रिभागाश्च यत्र। तथेति झटित्येव प्रेमरभसेन च। गृहीतमाभासितं परिचुम्बितुमाक्रान्तं च। निशाया मुखं प्रारम्भो वदन-कोकनदं चेति। यथेति झटिति ग्रहणेन प्रेमरभसेन च। तिमिरं चांशुकाश्च सूक्ष्मांशवः तिमिरांशुकं रश्मि-शबलीकृतं तमःपटलं, तिमिरांशुकं नीलजालिका नवोढा-प्रौढवधूचिता। रागाद् रक्तत्वात् सन्ध्याकृतादनन्तरं, प्रेमरूपाच्च हेतोः। पुरोऽपि पूर्वस्यां दिशि अग्रे च। गलितं प्रशान्तं पतितं च। रात्र्या करण-भूतया समस्तं मिश्रितम्, उपलक्षणत्वेन वा। न लक्षितं रात्रि-प्रारम्भोऽसौ इति न ज्ञातम्, तिमिर-संवलितांशुदर्शने हि रात्रिमुखमिति लोकेन लक्ष्यते, न तु स्फुट आलोके। नायिकापक्षे तु तयेति कर्त्तृपदम्।....अत्र च नायकेन पश्चाद्गतेन चुम्बनोपक्रमे पुरो नीलांशुकस्य गलनं पतनम्। तेनात्र व्यङ्ग्य प्रतीतेऽपि न प्राधान्यम्। तथाहि नायक-व्यवहारो निशा-शशिनावेव शृङ्गार-विभावरूपौ संस्कुर्वाणोऽलंकारतां भजते, ततस्तु वाच्याद्विभावीभूताद् रसनिःष्यन्दः॥"—*Op. cit.*, pp. 109-110.

We should note that the masculine and feminine genders of the two words शशिन् and निशा respectively are the pre-condition for super-imposition of the behaviour of नायक and नायिका on each of them respectively, and aid suggestion in conveying the अप्रस्तुत sense. As Jagannātha observes :—

"तस्मात् 'निशामुखं चुम्बति चन्द्रिकैषा', 'अहर्मुखं चुम्बति चण्ड-भानुः' इत्यादौ अप्रतीयमानं **नायकत्वं**[1] प्रकृते टाप्-प्रथमाभ्यां प्रति-

---

1 'स्त्रीपुंवच्च' इत्येकशेषः. Abhinavagupta splits up the expression समारोपितनायिका-नायक-व्यवहारयोः in the *Vṛtti* above as follows in order to avoid एकशेष—"नायिकाया नायके यो व्यवहारः स निशायां समारोपितः, नायिकायां नायकस्य यो व्यवहारः स शशिनि समा-रोपित इति व्याख्याने नैकशेषप्रसङ्गः"—°*Locana*, p. 111.

पादितेन प्रकृत्यर्थगतेन स्त्रीत्वेन पुंस्त्वेन च स्वाधिकरण एवाभिव्यज्यते। एवं च निशा-शशिनोर्नायकत्व-सिद्धिः श्लिष्ट-विशेषणैः, व्यञ्जन-व्यापारेणैवाप्रकृतार्थबोधनम्, शक्तेः प्रकरणादिना नियन्त्रणात्। तदित्थं व्यञ्जन-माहात्म्यादेवाप्रकृत-वाक्यार्थतादात्म्येन प्रकृत-वाक्यार्थोऽवतिष्ठते। गुणीभूतव्यङ्ग्यप्रभेदश्चायमिति तु रमणीयः पन्थाः।।"—*Op. cit.*, p. 499.

निशा-शशिनोरेव वाक्यार्थत्वात्—The description of the moon and the night is the chief import of the verse since it is contextual or प्राकरणिक.[1]

TEXT

§ ३२। आक्षेपेऽपि व्यङ्ग्य-विशेषाक्षेपिणोऽपि वाच्यस्यैव चारुत्वं प्राधान्येन वाक्यार्थ आक्षेपोक्ति-सामर्थ्यादेव ज्ञायते। तथाहि—तत्र शब्दोपारूढो विशेषाभिधानेच्छया प्रतिषेधरूपो य आक्षेपः स एव व्यङ्ग्यविशेषमाक्षिपन् मुख्यं काव्यशरीरम्। चारुत्वोत्कर्ष-निबन्धना हि वाच्य-व्यङ्ग्ययोः प्राधान्य-विवक्षा। यथा—

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिः कीदृक् तथापि न समागमः॥

अत्र सत्यामपि व्यङ्ग्य-प्रतीतौ वाच्यस्यैव चारुत्वमुत्कर्षवद् इति तस्यैव प्राधान्य-विवक्षा॥

---

1 Compare—'आगत्य संप्रति—' इत्यत्र नायक-वृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्ष-रवि-कमलिनी-वृत्तान्ताध्यारोपेणैव स्थितः।'–*Kāvyaprakāśa*, Chap. V. 'न ह्यत्र नायक-वृत्तान्तो रवि-कमलिनी-वृत्तान्तवत् प्राधान्यं लभते। कुतः? रवि-पद्मिनी-वृत्तान्तस्य प्रभात-प्रस्तावाद् वाच्यस्य सतोऽङ्गतां नीतत्वात्'—Māṇikya-Candra's *Saṁketa* thereon, p. 156 (Mysore Sans. Series Edn.)

EXPOSITION

§ 32. Bhāmaha defines आक्षेप as—'प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया। वक्ष्यमाणोक्त-विषयः स आक्षेपो द्विधा मतः।'—*Kāvyālaṁkāra*, II. 68. Thus where an *apparent negation* (निषेधाभास) is expressed only to convey with much greater force the intention of the speaker it is called आक्षेप. This *negation* might again be twofold—viz. it might refer to something *about to be spoken* (वक्ष्यमाण), or it might be the negation of *a statement already expressed in words* (उक्त). Thus, the ultimate *intention* (इष्ट) of the speaker is *suggested* and not expressed. The apparent negation which is expressed in words (शब्दोपारूढ), being incompatible (बाधित) with the context and such other factors, gives rise to the cognition of the ultimate intention of the speaker. As Jagannātha so clearly states :—

"चतुर्विधेऽस्मिन्नाक्षेप इष्टोऽर्थः, तस्य निषेधः, तस्याप्यसत्यत्वम्, अर्थंगतविशेष-प्रतिपादनं चेति चतुष्टयमुपयुज्यते। तेन नात्र निषेध-विधिः। न वा विहित-निषेधः। अपि तु निषेधेनासत्येन विधेराक्षिप्य-माणत्वात् योगार्थादाक्षेपः।"—*Op. cit.*, pp. 564-65.

Thus, आक्षेप is based on लक्षण-लक्षणा inasmuch as the expressed sense, viz. negation, is only apparent and has to be given up contradicted as it is by all other factors. Compare :—

"अत्र च निषेधः स्वयमनुपपद्यमानत्वाद् अविश्राम्यन् स्वात्मानं विध्यर्थे समर्पयति—इति 'परार्थे स्व-समर्पणम्'-इत्येवंरूपलक्षणा-मूलत्वमस्य सिद्धम्। यदुक्तमन्यत्र—"यत्र स्वयमविश्रान्तेः परार्थे स्व-समर्पणम्। कुरुतेऽसौ स आक्षेपो निषेधस्यैव भासनात् ॥"—इति।—Jayaratha's *Vimarśinī* on *Alaṁkārasarvasva* of Rūyyaka, p. 117.

Abhinavagupta quotes the definition of आक्षेप from

Bhāmaha's *Kāvyālamkāra* : आक्षेप इति—'प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया। वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।।' —तत्राद्यो यथा—'अहं त्वां यदि नेक्षेय क्षणमप्युत्सुका ततः। इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण ते ।।'—इति वक्ष्यमाणमरण-विषयो निषेधात्माऽऽक्षेपः। तत्रेयदस्तु इत्येतावदेवात्र 'म्रिये' इत्याक्षिपत् सत् चारुत्वनिबन्धनम् इत्याक्षेप्येण आक्षेपकमलंकृतं सत् प्रधानम्। उक्त-विषयस्तु यथा ममैव—

'भो भोः किं किमकाण्ड एव पतितस्त्वं पान्थ काऽन्या गतिः
तत्तादक् तृषितस्य मे खलमतिः सोऽयं जलं गूहते।
अस्थानोपनतामकाल-सुलभां तृष्णां प्रति क्रुध्य भोः
त्रैलोक्य-प्रथित-प्रभाव-महिमा मार्गः पुनर्मारवः ।।'

—अत्र कश्चित् सेवकः प्राप्तः प्राप्तव्यमस्मात् किमिति न लभे इति प्रत्याशा-विशस्यमानहृदयः केनचिदमुनाऽऽक्षेपेण प्रतिबोध्यते। तत्र आक्षेप्येण निषेधरूपेण असत्पुरुष-सेवा-तद्वैफल्य-तत्कृतोद्वेगात्मनः शान्तरस-स्थायिभूत-निर्वेद-विभावरूपतया चमत्कृतिदायित्वम् ।।"—*Op. cit.*, pp. 111-112.

आक्षेपेऽपि....ज्ञायते—In the figure of speech आक्षेप, too, it is the expressed sense that is predominant even though it gives rise to the knowledge of the suggested sense. And this view gains support from the derivative meaning of the term आक्षेप which is explained as 'आक्षिपति व्यङ्ग्यविशेषम् इति आक्षपः' and as such refers to the expressed sense.

चारुत्वोत्कर्ष....प्राधान्यविवक्षा—In determining which of the two senses (viz. expressed and suggested) is principal and which of them is subordinate, the sole criterion should be चारुत्व or beauty. In आक्षेप, it is the वाच्य sense that charms us, for it is the mode of expression that is more attractive than the suggested sense. And as the expressed sense excels

the suggested sense in beauty of form, it is reasonably held as superior to the latter.

We should note that Vāmana's definition of आक्षेप differs totally from that of Bhāmaha, Daṇḍin and Udbhaṭa. As he says :— 'उपमानाक्षेपश्चाक्षेप:'—*Kāvyālaṁkārasūtra*, IV. 3.27.
(१) "उपमानस्य क्षेप: प्रतिषेध: उपमानाक्षेप: । तुल्यकार्यार्थस्य नैरर्थक्य-विवक्षायाम् । यथा—

तस्याश्चेन्मुखमस्ति सौम्यसुभगं किं पार्वणेनेन्दुना
सौन्दर्यस्य पदं दृशौ च यदि चेत् किं नाम नीलोत्पलैः ।
किं वा कोमलकान्तिभि: किशलयैः सत्येव तत्राधरे
हा धातु: पुनरुक्त-वस्तुरचनारम्भेष्वपूर्वो ग्रहः ।।

(२) उपमानस्याक्षेपत: प्रतिपत्तिरित्यपि सूत्रार्थ: । यथा—
ऐन्द्रं धनु: पाण्डुपयोधरेण शरद् दधानार्द्रनखःक्षताभम् ।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार ।।
—अत्र शरद् वेश्येव, इन्दुं नायकमिव, रवे: प्रतिनायकस्येव इत्युपमानानि गम्यन्ते ।।"—*Vṛtti* thereon.

विद्वदुपज्ञा—The regular form as a तत्पुरुष compound ought to have been विद्वदुपज्ञम् (उक्तिः) in neuter by the rule—"उपज्ञोपक्रमं तदाद्याचिख्यासायाम्"—Pāṇini II. 4. 21 as in '**पाणिन्युपज्ञम**कालकं व्याकरणम्' which has been explained by Haradatta in his *Padamañjarī* as—"पूर्वाणि व्याकरणानि अद्यतनादिकाल-परिभाषायुक्तानि। तद्रहितं तु व्याकरणं पाणिनि-प्रभृतिप्रवृत्तम् इत्यस्ति तदादित्वस्याख्यानम्"—*loc. cit.* To justify this feminine form (विद्वदुपज्ञा) Abhinavagupta explains it as a बहुव्रीहि compound : "विद्वद्भ्य उपज्ञा प्रथम उपक्रमो यस्या उक्तेरिति बहुव्रीहिः। तेन 'उपज्ञोपक्रमम्—' इति तत्पुरुषाश्रयं नपुंसकत्वं निरवकाशम्।"—*Locana*, p. 132.

प्रथमे हि...सर्वविद्यानाम्—Compare :—

"उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्॥

किं बहुना—

"इदमाद्यं पदस्थानं मुक्ति-सोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।।
रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरण-संस्कार-पवित्रित-मुखा नराः ।।"

—*Vākyapadīya*, cited by Haradatta in his *Padamañjarī*, Vol. I. pp. 13-14.

Also—"सदोपभुक्तं सर्वाभिरन्यविद्याकरेणुभिः ।।
नापारयित्वा दुर्गाधममुं व्याकरणार्णवम् ।
शब्दरत्नं स्वयंगम्यमलंकर्तुमयं जनः ।।"—Bhāmaha's *Kāvyālaṁkāra, VI.* 2-3.

Jayanta Bhaṭṭa, too, in his *Nyāyamañjarī*, speaks highly of the Grammarians. Cp :—

"मनुना च पवितपावनत्वेन अधिगतव्याकरणो मीमांसकश्च स्व-स्मृतौ पठितौ—'यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्'-इति । पुष्पदन्तोऽप्याह—

'भ्रष्टः शापेन देव्याः शिवपुरवसतेर्वन्द्यहं मन्दभाग्यो
भाव्यं वा जन्मना मे यदि मलकलिले मर्त्यलोके सशोके ।
स्निग्धाभिर्दुग्धधाराऽमलमधुरसुधाबिन्दु-निष्यन्दिनीभिः
कामं जायेय वैयाकरणभणितिभिस्तूर्णमापूर्णकर्णः ।।'

—इति ।।"—*Op. cit.*, Vol. I. p. 392.

ते च श्रूयमाणेषु....ध्वनिरिति व्यवहरन्ति—The Grammarians argue that it is the स्फोट or *eternal* (नित्य) and *indivisible* (अविभाग) word that conveys the sense and not the word popularly conceived as such, that is meaningless being a collection of unmeaning and discrete sounds as it is. The sounds that are produced through the contact of our sense-organs are by themselves momentary and isolated[1], but they

---

1 Compare : "....एकैकवर्णवर्त्तित्वाद् वाचः, उच्चारित-प्रध्वंसितत्वाच्च

serve to *suggest the eternal word* (स्फोट), which is *one* and *indivisible* sound-unit (अखण्ड) and cannot further be analysed into constituent sound-units. This स्फोट is termed *dhvani* by the वैयाकरण's. But they also refer to the empirical sounds, that are momentary in character, also as *dhvani* (ध्वनतीति ध्वनि:), because they *suggest* (ध्वनति) that eternal स्फोट which alone is significant snd expressive. Patañjali in the *Paspaśā-Āhnika* of his *Mahābhāṣya* states :—"अथवा प्रतीतपदार्थको लोके ध्वनि: शब्द इत्युच्यते".[1] Bhāmaha, in his *Kāvyālaṁkāra* criticises the theory of *Sphoṭa* advanced by the Grammarians in the following *kārikās* :—

"प्रतीतिरर्थेषु यतस्तं शब्दं ब्रुवते परे ।
धूम-भासोरपि प्राप्ता शब्दताऽन्यानुमां प्रति ॥
नन्वकारादिवर्णानां समुदायोऽभिधेयवान् ।
अर्थप्रतीतये गीतः शब्द इत्यभिधीयते ॥
प्रत्येकमसमर्थानां समुदायोऽर्थवान् कथम् ।
वर्णानां क्रमवृत्तित्वात् न्याय्या नापि च संहतिः ॥
न चापि समुदायिभ्यः समुदायोऽतिरिच्यते ।
दारुभित्तिभुवोऽतीत्य किमन्यत् सद्म कल्प्यते ॥
तस्मात् कूटस्थ इत्येषा शाब्दी नः कल्पना वृथा ।
प्रत्यक्षमनुमानं वा यत्र तत् परमार्थतः ॥

वर्णानाम् ॥ एकैक-वर्ण-वर्त्तिनी वाक् । न द्वौ वर्णौ युगपदुच्चारयति । तद् यथा । गौरित्युक्ते यावद् ग-कारे वाक् प्रवर्त्तते तावत् नौकारे न विसर्जनीये । यावदौकारे न ग-कारे न विसर्जनीये । यावद् विसर्जनीये न ग-कारे नौकारे । उच्चरित-प्रध्वंसितत्वाच्च वर्णानाम् । उच्चरितः प्रध्वस्तश्च । अथापरः प्रयुज्यते न वर्णो वर्णस्य सहायः ॥—*Mahābhāṣya* on P. VI. 3.59 ; also on P. I. 4. 109.

1. For a differentiation between स्फोट and ध्वनि *vide Mahābhāṣya* under *Vārttika* 5 on P. I. I. 70.

शपथैरपि चादेयं वचो न स्फोटवादिनाम् ।
नभःकुसुममस्तीति श्रद्दध्यात् कः सचेतनः ।।
इयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः ।
व्यवहाराय लोकस्य प्रागित्थं समयः कृतः ।।
स कूटस्थोऽनपायी च नादादन्यश्च कथ्यते ।
मन्दाः सांकेतिकानर्थान् मन्यन्ते पारमार्थिकान् ।।
विनश्वरोऽस्तु नित्यो वा सम्बन्धोऽर्थेन वा सता ।
नमोऽस्तु तेभ्यो विद्वद्भ्यः प्रमाणं येऽस्य निश्चितौ ।।

—*Op. cit.*, *VI.* 7-15

तथैवान्यैः· · · ·ध्वनिरित्युक्तः[1]—The critics (viz. the Dhvani-theorists), too, have formulated their theory of ध्वनि on the analogy of the *sphoṭa*-theory of the Grammarians. Just as the Grammarians apply the term *Dhvani* to the *sounds* that *suggest* the eternal *sphoṭa*, so also the critics of this school apply the self-same term ध्वनि *to the words* (वाचक-शब्द) and *the expressed sense* (वाच्यार्थ) that *severally* and *jointly suggest* the *implied sense* (प्रतीयमानार्थ). Now, it might be argued : 'Even conceding that the वाच्यार्थ and the वाचकशब्द are referred to as ध्वनि on the analogy of the similar usage of the Grammarians, on what grounds would you designate the function of suggestion (व्यञ्जना-व्यापार) and the *implied sense* (प्रतीयमानार्थ) as well by that self-same term ?' Abhinavagupta with great ingenuity has interpreted the text of the *Vṛtti* in such a way as to comprehend all the *four* elements (viz. शब्द, अर्थ, व्यापार and व्यङ्ग्य) within the connotation of the term *dhvani* and has cited relevant texts from Bhartṛ-

---

1 Compare : 'परिनिश्चित-निरपभ्रंश-शब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं ध्वनि-व्यवहार इति तैः सह किं विरोधाविरोधौ चिन्त्येते ।।'—*Dhvanyāloka*, Uddyota III. (pp. 443-444).

hari's *Vākyapadīya* to justify the interpretation proposed by him, thus placing the theory of *Dhvani* on a sound basis by showing that in all its aspects it corresponds exactly with the usage of the Grammarians who are the highest authority regarding linguistic questions. We quote here the text of Abhinavagupta's commentary in full :—

"श्रूयमाणेष्विति । (?) श्रोत्र-शष्कुलीं सन्तानेनागता अन्त्याः शब्दाः श्रूयन्ते इति प्रक्रियायां शब्दजाः शब्दाः श्रूयमाणाः इत्युक्तम् । तेषां घण्टानुरणनरूपत्वं तावदस्ति । ते च ध्वनि-शब्देनोक्ताः । यथाह भगवान् भर्तृहरिः—

'यः संयोग-वियोगाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यरुदाहृताः ॥' इति ।

एवं घण्टा-निर्ह्राद-स्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः । (२) तथा श्रूयमाणा ये वर्णा नाद-शब्द-वाच्या अन्त्य-बुद्धि-निर्ग्राह्य-स्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ताः । यथाह भगवान् स एव—

'प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनि-प्रकाशिते शब्दे स्वरूपमवधार्यते ॥'—इति ।

तेन व्यञ्जकौ शब्दार्थावपीह ध्वनिशब्देनोक्तौ । (३) किंच वर्णेषु तावन्मात्र-परिमाणेष्वपि सत्सु । यथोक्तम्—

'अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः ।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम् ॥' इति ।

तेषु तावत्स्वेव श्रूयमाणेषु वक्तुर्योऽन्यो द्रुत-विलम्बितादिवृत्तिभेदात्मा प्रसिद्धादुच्चारणव्यापारादभ्यधिकः स ध्वनिरुक्तः । यदाह स एव—

'शब्दस्योर्द्ध्वमभिव्यक्तेर्वृत्तिभदे तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥' इति ।

अस्माभिरपि प्रसिद्धेभ्यः शब्दव्यापारेभ्योऽभिधा-तात्पर्य-लक्षणा-

रूपेभ्योऽतिरिक्तो व्यापारो ध्वनिरित्युक्तः। **एवं चतुष्कमपि ध्वनिः।** तद्योगाच्च समस्तमपि काव्यं ध्वनिः। तेन व्यतिरेकाव्यतिरेक-व्यपदेशोऽपि न युक्तः ॥"—*Op. cit.*, pp. 133-135.

Abhinavagupta explains the expression वाच्य-वाचक-सम्मिश्रः शब्दात्मा as referring to the above-noted four elements of व्यञ्जना-viz., वाच्य, वाचक, व्यङ्ग्य and व्यञ्जना :—

"वाच्य-वाचक-सम्मिश्र इति। वाच्य-वाचक-सहितः संमिश्र इति मध्यपदलोपी समासः। 'गामश्वं पुरुषं पशुम्' इतिवत् समुच्चयोऽत्र चकारेण विनाऽपि। तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। संमिश्र्यते विभावानुभाव-संवलनयेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापार, न चासौ अभिधादिरूपः, अपि तु आत्मभूतः, सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः। उक्तप्रकारध्वनि-चतुष्टयमयत्वात्। अत एव साधारणहेतुमाह—व्यञ्जकत्व-साम्यात् इति। व्यङ्ग्य-व्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः साधारण इत्यर्थः ॥"—*Op. cit.*, p. 135. [1]

---

[1] It is to be noted that the interpretation proposed by Abhinavagupta, though ingenious, is somewhat strained and farfetched and seems to have not been the intention of the *Vṛttikāra* himself. Māṇikyacandra's *Saṁketa* on the *Kāvya-prakāśa* is very clear on this point :—

"ननु ध्वन्यते द्योत्यते इति व्यङ्ग्यं, स च काव्यात्मा। तत् कथं काव्यं ध्वनिरित्याह। आत्मात्मवतोरभेदेनोपचारात्। यदा तु ध्वनतीति ध्वनिः-इति कर्तृव्युत्पत्तिः, तदा नोपचारः।....यद्यपि ध्वननमिति भाव-व्युत्पत्त्या ध्वनिः शब्दार्थ-व्यापारः, ध्वन्यते इति कर्मव्युत्पत्त्या व्यङ्ग्योऽर्थः, ध्वनतीति कर्तृव्युत्पत्त्या ध्वनिः शब्दोऽर्थो वा शब्दार्थयुगलं काव्यरूपं वा, तथापि कारिकायां शब्दार्थ-समुदाय एव काव्यरूपो मुख्यतया ध्वनि-नाम्ना प्रख्यापितः, यथोक्तप्रकार-ध्वनिमयत्वात्।"—*Op. cit.*, p. 12 (Mysore Edition). See, however, °*Locana*, p. 106 : "कारिकया तु प्राधान्येन समुदाय एव काव्यरुपो मुख्यतया ध्वनिरिति प्रतिपादितम्।"

In the *Kāvyaprakāśa*, Mammaṭa also notes that this theory of ध्वनि was formulated on the analogy of the *sphoṭa*-theory of the Grammarians and as such it rests on an unshakable foundation :—

"इदमुत्तममतिशयिनि वाच्ये व्यङ्ग्याद् ध्वनिर्बुधैः कथितः।' —इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूत-स्फोटरूप-व्यङ्ग्य-व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिः सूरिभिरन्यैरपि न्यग्भावित-वाच्य-व्यङ्ग्य-व्यञ्जनक्षमस्य शब्दार्थ-युगलस्य ॥"—*Op. cit.*, Ucchvāsa I. *Kārikā* 4 and *Vṛtti* thereon.

Caṇḍīdāsa, in his gloss on the *Kāvyaprakās'a*, thus brings out the significance of the word बुधैः in the above extract :—

"बुधैरिति कारिका-पदं ध्वनि-व्यवहार-निर्मूलत्व-शङ्कानिरासाय[1] इत्याह 'वैयाकरणै'-रिति। **प्रधानेति**—अर्थ-प्रत्ययरूप-फलप्रत्यासत्त्ये-त्यर्थः। स्फुटत्यर्थोऽस्मात् इति स्फोटः, पूर्व-पूर्व-वर्णानुभवजनित-संस्कार-सध्रीचानान्त्यवर्णानुभवजनित-प्रतिपत्तृगतातिशयवशादपरोक्ष इव क्रियमाणः सकलाभिधेयाभिधानमयतया स्वीक्रियमाणः, यमिमं शब्दब्रह्मेत्याहुः। स च व्यङ्ग्यः सन्नेवाविष्क्रयमाणोऽर्थमभ्यानयति। तदनुगुणा च शब्दे वर्णात्मके काचिदुक्तिः। सा च नाभिधादिः, संकेतापेक्षाविरहात्। वर्णाश्च ध्वननद्वारैव तथा विप्लवन्तीति ध्वननाख्या सो शक्तिः।"—*loc. cit.*, p. 16 (*Saraswatī Bhavana Text*).

Mahimabhaṭṭa, in his *Vyaktiviveka*, criticises the *Dhvani*-theorists for taking their stand on the *Sphoṭa*-theory of the Grammarians, for between the *momentary sounds* (क्षणिका वर्णाः)

---

1 Compare : "बुधैरिति बहुवचनेन ध्वनि-व्यवहारस्यानादित्वं सूच्यते" —Māṇikyacandra's *Saṁketa*, *loc. cit.*

and the *eternal Word* (स्फोट) there can be no *suggestion* (व्यङ्ग्य-व्यञ्जकभाव) in the real sense of the term :—

"अत एव श्रूयमाणानां वर्णानां ध्वनि-व्यपदेश्यानाम् अन्तःसन्निवेशिनश्च स्फोटाभिमतस्यार्थस्य व्यङ्ग्य-व्यञ्जकभावो न संभवतीति व्यञ्जकत्व-साम्याद यः शब्दा त्मनि काव्ये ध्वनि-व्यपदेशः सोऽप्यनुपपन्नः । तत्रापि कार्य-कारणमूलस्य गम्य-गमकभावस्योपगमात् ॥" —*Op. cit.*, p. 57.

नचैवंविधस्य....युक्त एव संरम्भः—Having thus established with weighty arguments and with irrefutable logic the existence of *Dhvani*, Ānandavardhana recalls the sarcastic remarks of the Negativists (viz. किञ्च वाग्विकल्पानामानन्त्यात् सम्भवत्यपि वा कस्मिंश्चित् काव्यलक्षण-विधायिभिः प्रसिद्धैरप्रदर्शिते प्रकार-लेशे ध्वनिर्ध्वनिरिति यदेतदलीक-सहृदयत्व-सम्भावना-मुकुलितलोचनैर्नृत्यते, तत्र हेतुं न विद्मः). The endeavour of the *Dhvani*-theorists cannot be discarded as fruitless, for the element of *dhvani* is quite a novel discovery and the most important one at that, and the opponents can in no way belittle this innovation of the new school by assimilating it with the notice of a new and hitherto unknown figure of speech. *Dhvani* stands superior to all other elements of poetry in so far as it is the *soul,* while the other figures of speech etc. appertain to the exterior of a poetic art. And in view of all this, the formulators of this novel theory are entitled to no mean credit and nobody can legitimately blame them, if they wax a little in self-approbation. As Abhinavagupta comments :—

"यत् पुनरेतदुक्तं 'वाग्विकल्पानामानन्त्यात्' इत्यादि, तत् परिहरति—**न चैवंविधस्येति** । वक्ष्यमाणः प्रभेदो यथा—मुख्ये रूपे । तद्भेदा यथा—अर्थान्तर-संक्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्य इत्यविवक्षितवाच्यस्य, असंलक्ष्यक्रम-व्यङ्ग्यः संलक्ष्यक्रम-व्यङ्ग्य

इति विवक्षितान्यपर-वाच्यस्येति । तत्राप्यवान्तरभेदाः । **महाविषयस्येति**--अशेषलक्ष्यव्यापिन इत्यर्थः । विशेषग्रहणेनाव्यापकत्वमाह । मात्रशब्देनाङ्गित्वाभावम् । तत्र ध्वनि-स्वरूपे भावितं प्रणिहितं चेतो येषां, तेन वा चमत्काररूपेण भावितमधिवासितमत एव मुकुलित-लोचनत्वादिविकारकारणं चेतो येषाम् इति ।'' - *Op. cit.*, pp. 135-136.

न च तेषु....आविष्करणीयम्—शेमुषी-प्रज्ञा. It is not proper on the part of the opponents to give vent to jealousy and vindictive spirit toward the *Dhvani*-theorists, since the arguments advanced by the latter in favour of their thesis are all based on logic and sound reason.

तदेवं....प्रत्युक्ताः--'Thus, in the preceding sections the views of the Negativists (with their *three* sub-groups) have been duly criticised and refuted. **'अभाव-वादिन** इति । अवान्तर-प्रकारत्रयभिन्ना अपीत्यर्थः'--°*Locana*, *loc. cit.*

TEXT

§ ४१ । अस्ति ध्वनिः । स चासौ अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन । तत्राद्यस्योदाहरणम्—

'सुवर्ण-पुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥'

द्वितीयस्यापि—

'शिखरिणि क नु नाम कियच्चिरं
किमभिधानमसावकरोत्तपः ।
तरुणि येन तवाधरपाटलं
दशति बिम्बफलं शुक-शावकः ॥'

EXPOSITION

§ 41. अस्ति ध्वनिः--The existence of *dhvani* has been

established. It is a reality and not a figment of imagination. स चासौ....सामान्येन—*Dhvani* has been, first of all, classified into *two* broad divisions—*viz.*, अविवक्षितवाच्य and विवक्षितान्यपरवाच्य. The first of these two varieties is based on लक्षणा or *Indication* and has two more sub-divisions according as it rests on उपादानलक्षणा (or अजहत्स्वार्था लक्षणा) or लक्षण-लक्षणा (or जहत्स्वार्था लक्षणा). In the first case it is called अर्थान्तर-संक्रमितवाच्य-ध्वनि while the second variety is known as अत्यन्ततिरस्कृतवाच्य-ध्वनि. Compare :—

"अत्राद्ये मुख्यार्थस्यार्थान्तरे संक्रमणं प्रवेशः। न तु तिरोभावः। अत एवात्र अजहत्स्वार्था लक्षणा। द्वितीये तु स्वार्थस्यात्यन्तं तिरस्कृतत्वात् जहत्स्वार्था।"—*Sāhityadarpaṇa*, Chap. IV.

Also :—"अयं च ध्वनिभेदो लक्षणामूल-गूढव्यङ्ग्य-प्राधान्ये सति संभवति। अविवक्षित च वाच्यस्यान्वयानुपपत्तेः। सा च वाच्यस्यानुपयुक्तत्वेन, उपयोगिनि रूपान्तरे तात्पर्याद् वा, स्वत एव अन्वयायोग्यत्वाद् वा। अनुपयुक्तत्वमपि पुनरुक्तत्वात्, विशेषानाधायकत्वमात्राद् वा। तत्रोभयत्रापि वाच्यमर्थान्तरे उपयोगिनि लक्ष्यताऽवच्छेदके संक्रमितमाश्रयत्वेन परिणामितम्। वाच्योऽप्य र्थे रूपान्तरेण लक्ष्यते इत्यर्थः। द्वितीये तु वाच्यमत्यन्त-तिरस्कृतं न केनापि रूपेणान्वयप्रविष्टम्॥"—Govinda Ṭhakkura's °*Pradīpa* on *Kāvyaprakāśa*, IV. 1.

We should note that in the case of suggestion based on लक्षणा, the suggested sense must invariably be some *vastu*. It can never partake of the character of an *alaṁkāra* or *rasa*, for in a लक्षणा the प्रयोजन is always some sort of *vastu*. The other principal division of ध्वनि—*viz*. विवक्षितान्यपर-वाच्य, again can be divided into *two* categories—*viz*. संलक्ष्यक्रम-व्यङ्ग्य (where the sequence between the cognitions of the expressed and the suggested sense is noticeable) and असंलक्ष्यक्रम-व्यङ्ग्य (where

the above sequence is not perceptible at all). वस्तु and अलंकार fall within the scope of the first category, while रस, भाव etc. are classed under the second group. Rūyyaka, in his *Alaṁkārasarvasva*, has briefly shown these divisions of *dhvani* in the following passage :—

"तत्रोत्तमो ध्वनिः। तस्य लक्षणाभिधामूलत्वेन अविवक्षित-वाच्य-विवक्षितान्यपरवाच्याख्यौ द्वौ भेदौ। आद्योऽपि अर्थान्तर-संक्रमितवाच्यात्यन्ततिरस्कृतवाच्यत्वेन द्विविधः। द्वितीयोऽपि अलक्ष्य-क्रम-संलक्ष्यक्रमव्यङ्ग्यतया द्विविधः। लक्षणामूल-शब्दशक्तिमूलो वस्तु-ध्वनिः। असंलक्ष्यक्रमव्यङ्ग्योऽर्थशक्तिमूलो रसादिध्वनिः। संलक्ष्य-क्रमव्यङ्ग्यः शब्दार्थोभयशक्तिमूलो वस्तुध्वनिरलंकारध्वनिश्च ॥"

—*Op. cit.*, pp. 14–15.

All these divisions of *dhvani* have been shown in details by the *Kārikākāra* in the following *Uddyota*. See *Kārikās*, II. 1-3. The *Vṛttikāra* here refers to those divisions in anticipation of the *Kārikākāra's* views. As Abhinavagupta observes :—

"**अस्तीति**—उदाहरण-पृष्ठे भाक्तत्वं सुशङ्कं सुपरिहरं च भवतीत्यभिप्रायेण उदाहरणदानावकाशार्थं भाक्तत्वालक्षणीयत्वे प्रथमं परिहरणयोग्ये अपि अप्रतिसमाधाय **भविष्यदुद्द्योतानुवादानुसारेण वृत्तिकृदेव प्रभेदनिरूपणं करोति**—स चेति। पञ्चधाऽपि ध्वनि-शब्दार्थे 'येन यत्र यतो यस्य यस्मै'—इति बहुव्रीह्यर्थाश्रयेण यथोचितं सामानाधिकरण्यं सुयोज्यम्। वाच्येऽर्थे तु ध्वनौ वाच्य-शब्देन स्वात्मा तेनाविवक्षितोऽप्रधानीकृतः स्वात्मा येनेत्यविवक्षित-वाच्यो व्यञ्जकोऽर्थः। एवं विवक्षितान्यपर-वाच्येऽपि। यदि वा कर्मधारयेणार्थपक्षे अविवक्षितश्चासौ वाच्यश्चेति। विवक्षितान्य-परश्चासौ वाच्यश्चेति। तत्रार्थः कदाचिद् अनुपपद्यमानत्वादिना निमित्तेनाविवक्षितो भवति। कदाचिदुपपद्यमान इति कृत्वा विवक्षित

एव, व्यङ्ग्यपर्यन्तां तु प्रतीतिं स्व-सौभाग्य-महिम्ना करोति। अत एवार्थोऽत्र प्राधान्येन व्यञ्जकः, पूर्वत्र शब्दः। ननु च विवक्षा च अन्यपरत्वं चेति विरुद्धम्। अन्यपरत्वेनैव विवक्षणात् को विरोधः ॥"
—*Op. cit.*, pp. 136-137.

"सुवर्ण....सेवितुम्"—"Only three types of men can *pluck the golden flowers of this Earth—viz.* the brave, the learned and the parasites." This verse illustrates the अविवक्षितवाच्य variety of ध्वनि based on लक्षणा. Here the primary sense being incompatible, we have to resort to *Indication* or लक्षणा. In reality, the Earth is not a tree, nor has it any golden sprouts in the true sense of the term, so that the primary sense (मुख्यार्थ) of the expression सुवर्णपुष्पां cannot be construed with पृथिवीम्, and as such has to be abandoned altogether in favour of the secondary sense. So also with the verb चिन्वन्ति which primarily means 'to pluck'. The object for which such लाक्षणिक words have been employed by the poet is to convey the idea that these three types of men alone can achieve success in this world and can amass wealth. Compare Abhinavagupta :—

'सुवर्णानि पुष्प्यति इति सुवर्ण-पुष्पा। एतच्च वाक्यमेवासम्भवत्-स्वार्थम् इति कृत्वाऽविवक्षितवाच्यम्। तत एव पदार्थमभिधाय अन्वयं च तात्पर्य-शक्त्याऽवगमय्यैव बाधकवशेन तमुपहृप्य सादृश्यात् सुलभ-समृद्धि-सम्भार-भाजनतां लक्षयति। तल्लक्षणा-प्रयोजनं शूर-कृतविद्य-सेवकानां प्राशस्त्यमशब्दवाच्यत्वेन गोप्यमानं सत् नायिका-कुच-कलश-युगलमिव महार्घतामुपयद् ध्वन्यत इति शब्दोऽत्र प्रधान-तया व्यञ्जकः, अर्थस्तु तत्सहकारितया इति चत्वारो व्यापाराः ॥'
—*Locana*, pp. 137-138.

Mahimabhaṭṭa, on the other hand, thus establishes *Inference* :—

"अत्र शूरादीनां त्रयाणां सर्वत्रैव स्वाधीनाः सम्पदो भवन्तीति साध्यम्। तत्र सुवर्णपुष्प-पृथिवी-चयने कर्त्तृत्वाभिधानं तेषां हेतुः। तद्धि मुख्यमनुपपद्यमानं वाक्यार्थोपचारवृत्त्या तत्सदृशमेव सर्वत्र सुलभ-विभवत्वम् अनुमापयति। यथा पदार्थोपचारे 'गङ्गायां घोष'-इत्यत्र गङ्गाशब्दो गङ्गासमीपवर्त्तिनं तटम्। द्विविधो हि उपचार इष्टः पदार्थ-वाक्यार्थविषयत्वात्। उपचारे च वाच्यस्योपायत्वात् अप्राधान्ये सति अविवक्षितत्वमेव भवति, उपचार-विषयस्यैव उपेयतया प्राधान्यात्। तयोश्च प्रसिद्धिकृत एवाविनाभावनियमोऽवगन्तव्यः, साध्यश्चानुमेय एव, न वचनगोचरतां गच्छतीत्युक्तम्॥"—*Vyakti-viveka*, pp. 412-413.

'शिखरिणि......शुक-शावकः'—In this verse, a paramour covertly expresses his own heart-felt desire to his lady-love by referring to the parrot's pecking at the *bimba*-fruit crimson as her lips. The primary sense here is not incompatible as in the preceding illustration, and as such there is no trace of लक्षणा or *Indication* in this case. Abhinavagupta explains this verse as follows :—

"**शिखरिणीति**—न हि निर्विघ्नोत्तम-सि योऽपि श्रीपर्वतादय इमां सिद्धिं विदध्युः। दिव्यकल्पसहस्रादिश्चात्र परिमितः कालः। न चैवंविधोत्तमफलजनकत्वेन पञ्चाग्नि-प्रभृत्यपि तपः श्रुतम्।.... दशतीत्यास्वादयति अविच्छिन्न-प्रबन्धतया, न त्वौदरिकवत् परं भुङ्क्ते, अपि तु रसज्ञोऽत्रेति तत्प्राप्तिवदेव रसज्ञताप्यस्य तपःप्रभावादेवेति। 'शुक-शावक' इति तारुण्यादुचितकाल-लाभोऽपि तपस एवेति। अनुरागिणश्च प्रच्छन्न-स्वाभिप्राय-प्रख्यापन-वैदग्ध्य-चाटुविरचनात्मक-विभावोद्दीपनं व्यङ्ग्यम्। अत्र च त्रय एव व्यापाराः। अभिधा तात्पर्यं ध्वननं चेति। मुख्यार्थबाधाद्यभावे मध्यमकक्ष्यायां लक्षणायास्तृतीयस्या अभावात्॥' — *Op. cit.*, pp. 139-40. Compare

Vyaktiviveka : "शिखरिणी"-त्यत्र त्वदधर-पल्लव-परिचुम्बनामृतं नाल्पपुण्यः पुमानासादयतीति चाटुकरूपोऽर्थः साध्यः। तत्सादृश्य-लवालम्बिनो बिम्बफलस्यापि परिखण्डनविधौ शुकशावकस्य लोकोत्तर-तपःपरिणामशालित्व-समारोपो हेतुः। यत्र खलु यत्सादृश्य-सद्-भावमात्रभाजो भावस्य पुण्योपचय-परिश्रम-परिप्रापणीयत्वमाशङ्क्यते तत्र तस्य तत्सम्बन्धिनो मुख्यस्यैव कथं नावगम्यते ? तस्मात् अत्रापि साध्य-साधन-भाव-गर्भतैवोपपन्नेति सिद्धम् ।।"—*Op. cit.*, p. 413.

TEXT

§ ४२। यदप्युक्तं भक्तिर्ध्वनिरिति तत् प्रतिसमाधीयते—

भक्त्या बिभर्त्ति नैकत्वं रूपभेदादयं ध्वनिः ।

अयमुक्तप्रकारो ध्वनिर्भक्त्या नैकत्वं बिभर्त्ति, भिन्नरूपत्वात्। वाच्य-व्यतिरिक्तस्यार्थस्य वाच्य-वाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्य-प्राधान्ये स ध्वनिः। उपचारमात्रं तु भक्तिः ॥

EXPOSITION

§ 42. The *Dhvanikāra* now takes up the second contention of the opponents—viz. that *dhvani* or the suggested sense is nothing apart from the लक्ष्य sense, and can be conveyed through the self-same function of लक्षणा. Abhinavagupta states, that the opponents who endeavour to deny ध्वनि any independent status might take up *three* different positions—(1) They might hold that भक्ति and ध्वनि are completely identical in all their aspects and as such, of the *two* above terms, one is the synonym of the other, as is the case with the terms घट and कलश ; (2) Some of them might, again, hold that भक्ति is the essential mark, the *differentia* of *dhvani*, just as पृथिवीत्व is the essential and uncommon attribute of *earthly objects* (पार्थिव-द्रव्य) ; (3) Or, it might be argued that भक्ति is merely an adventitious, an accidental, attribute (an *accidens* according to Western Logic) of ध्वनि. The *Dhvani-*

kāra would refute all these possible contentions one by one. and in the present section he examines the *first* of these three positions. Compare :—

"अयं भावः। भक्तिश्च ध्वनिश्चेति किं पर्यायवत् ताद्रूप्यम् ? अथ पृथिवीत्वमिव पृथिव्या अन्यतो व्यावर्त्तकधर्मरूपतया लक्षणम् ? उत काक इव देवदत्त-गृहस्य सम्भवमात्रादुपलक्षणम् ? तत्र प्रथमं पक्षं निराकरोति—भक्त्या बिभर्त्तीति ॥"—*Locana*, p. 140.

भक्त्या......ध्वनिः'—*Dhvani* cannot be identified with भक्ति inasmuch as they are *entitatively different* (भिन्नरूप). For the designation *dhvani* applies to that piece of poetry where the words and the primary sense subordinate themselves to the प्रयोजन, which should excel in charm the expressed sense. But भक्ति does not require these conditions. Mere *superimposition* (उपचार) without any consideration of the charm arising from the cognition of the प्रयोजन would satisfy all the requirements of भक्ति. In ध्वनि the beauty of the प्रयोजन is the predominant factor, while in भक्ति no consideration of its excellence should deter us. As Abhinavagupta explains :—"रूपभेदं दर्शयितुं ध्वनेस्तावद् रूपमाह—**वाच्येति**। तात्पर्येण विश्रान्तिधामतया प्रयोजनत्वेनेति यावत्। प्रकाशनं द्योतनमित्यर्थः। **उपचारमात्रम्**-इति। उपचारो गुणवृत्तिर्लक्षणा। उपचरणम् अतिशयितो व्यवहार इत्यर्थः। मात्रशब्देनेदमाह—यत्र लक्षणाव्यापारात् तृतीयाद् अन्यश्चतुर्थः प्रयोजन-द्योतनात्मा व्यापारो वस्तुस्थित्या सम्भवन्नपि अनुपयुज्यमानत्वेन अनाद्रियमाणत्वादसत्कल्पः, 'यमर्थमधिकृत्य' इति हि प्रयोजन-लक्षणम्, तत्रापि लक्षणाऽस्तीति कथं ध्वननं लक्षणा च इत्येकं तत्त्वं स्यात् ॥—*Op. cit.*, pp. 141-142.

The *Vṛttikāra*, in the *Third Uddyota*, has brought out the distinction between भक्ति and ध्वनि much more explicitly—

"अविवक्षित-वाच्यस्तु ध्वनिर्गुणवृत्तेः कथं भिद्यते ? तस्य प्रभेद-

द्वये गुणवृत्ति-प्रभेदद्वयरूपता लक्ष्यत एव यतः। अयमपि न दोषः। यस्मात् अविवक्षित-वाच्यो ध्वनिर्गुणवृत्तिमार्गाश्रयोऽपि भवति, नतु गुणवृत्तिरूप एव। गुणवृत्तिर्हि व्यञ्जकत्वशून्याऽपि दृश्यते। व्यञ्जकत्वं तु यथोक्तचारुत्वहेतुं व्यङ्ग्यं विना न व्यवतिष्ठते। गुणवृत्तिस्तु वाच्यधर्माश्रयेणैव व्यङ्ग्यमात्राश्रयेण चाभेदोपचाररूपा संभवति। यथा—तीक्ष्णत्वाद् 'अग्निर्माणवकः', आह्लादकत्वात् 'चन्द्र एवास्या मुख'मित्यादौ। यथा च 'प्रिये जने नास्ति पुनरुक्तम्' इत्यादौ। याऽपि लक्षणारूपा गुणवृत्तिः साऽपि उपलक्षणीयार्थ-संबन्धमात्राश्रयेण चारुरूप-व्यङ्ग्य-प्रतीतिं विनाऽपि संभवत्येव, यथा 'मञ्चाः क्रोशन्ती'-त्यादौ विषये ॥"—*Dhvanyāloka*, pp. 432-433.

TEXT

§ ४३। मा चैतत्। स्याद्भक्तिर्लक्षणं ध्वनेरित्याह—

अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया ॥१४॥

न च भक्त्या ध्वनिर्लक्ष्यते। कथम्? अतिव्याप्तेरव्याप्तेश्च। तत्रातिव्याप्तिर्ध्वनि-व्यतिरिक्तेऽपि विषये भक्तेः संभवात्। यत्र हि व्यङ्ग्यकृतं महत् सौष्ठवं नास्ति तत्रापि उपचरित-शब्दवृत्त्या प्रसिद्ध्यनुरोधप्रवर्त्तित-व्यवहाराः कवयो दृश्यन्ते। यथा—

> परिम्लानं पीनस्तन-जघन-सङ्गादुभयत-
> स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
> इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
> कृशाङ्ग्याः सन्तापं वदति विसिनी-पत्रशयनम् ॥

तथा—

> चुम्बिज्जइ सअहुत्तं अवरुन्धिज्जइ सहस्सहुत्तम्मि।
> विरमिअ पुणो रमिज्जइ पिओ जणो णत्थि पुनरुत्तम् ॥

तथा—

कुविआओ पसन्नाओ ओरण्ण-मुहीओ विहसमाणाओ ।
जह गहिओ तह हिअअं हरन्ति उच्छिन्तमहिलाओ ॥

तथा—

अज्जाएँ पहारो णवलदाए दिण्णो पिएण थणवट्ठे ।
मिउओ वि दूसहो व्विअ जाओ हिअए सवत्तीणम् ॥

तथा—

परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः ॥

-इत्यत्र इक्षुपक्षेऽनुभवतिशब्दः ।
न चैवंविधः कदाचिदपि ध्वनेर्विषयः ॥

EXPOSITION

§ 43. The first position, however, might be altogether given up and the second standpoint adopted. It might be argued that भक्ति is the *definition* (लक्षण), *i.e.* the essential and specific attribute of ध्वनि. To this the *Dhvanikāra* replies by saying: 'अतिव्याप्तेः......तया'—Nor can it be urged that भक्ति is the definition of *dhvani*, inasmuch as the *definition* in that case becomes either *too wide* or *too narrow*. An attribute can be regarded as a *definition*, if it inheres in all the individual members belonging to that class to be defined (यावल्लक्ष्यवृत्ति). The attribute पृथिवीत्व can be called a definition, since it is found in every instance of पृथिवी. The necessity of a definition consists in the differentiation (व्यावृत्ति) of the individual or class to be defined from all other individuals or classes. Thus पृथिवीत्व serves to mark off पृथिवी as a class from all other categories like जल, तेजस् etc. We are to note that a

लक्षण or *definition* is a sort of केवलव्यतिरेकि-हेतु[1], *i.e.* a हेतु whose *negation* (अभाव) agrees with the *negation* of the साध्य ('साध्याभाव-व्यापकत्वं हेत्वभावस्य यद् भवेत्'). Thus, the negation of पृथिवीत्व agrees with the negation of पृथिवी, as in categories like सलिल, तेजस् etc., which are different from पृथिवी, there is an absence of पृथिवीत्व too. Compare :—

"पृथिवीत्वाभिसम्बन्धात् पृथिवीति। पृथिवीत्वं नाम सामान्य-विशेषः, तेनाभिमतः सम्बन्धः समवाय-लक्षणः, तस्मात्।....ननु पृथिवी-स्वरूप-सिद्धौ किं लक्षणेन ? सिद्धे साधनस्य वैयर्थ्यात्, तदसिद्धौ चाश्रयासिद्धेः। न, स्वरूपसिद्धौ अपि इतर-व्यवच्छेदस्य साध्यमानत्वात्। तथाहि पृथिवी अबादिभ्यो भिद्यते, पृथिवीत्वात्। यत् पुनरितरेभ्यो न भिद्यते, नासौ पृथिवी, यथा अबादि। न चेयं न पृथिवी। तस्मादितरेभ्यो भिद्यते।....अथ किमेतत् लक्षण-मिति ? उच्यते। **केवल-व्यतिरेकि-हेतुविशेष एव लक्षणम्।** तथा चाचार्याः—'समानासमानजातीयव्यवच्छेदो लक्षणार्थः' इति।....व्यवहारसिद्धिर्वा लक्षण-प्रयोजनम्। तथाहि—विवादाध्यासित द्रव्यं पृथिवीति व्यवह्रियते लोकेन, पृथिवीत्वात्। यत् पुनः पृथिवीति न व्यवह्रियते, न सा पृथिवी, यथा अबादि। न च नेयं पृथिवी। तस्मात् तथा व्यवह्रियत इति।।"—Udayana's *Kiraṇā-valī*, pp. 41-43. (*Benares Sanskrit Series Edn.*)

Thus, in the way shown above, it becomes evident that *a definition is a special variety of* हेतु, and as such, to be valid, it must satisfy all the conditions that a *valid reason* (सद्धेतु) is required to satisfy. Those conditions are पक्षसत्त्व, सपक्ष-सत्त्व and विपक्षासत्त्व. But if any of these three conditions be lacking, the definition becomes fallacious. Thus, if the first

1 The English rendering of the term would be '*purely negatively concomitant*'.

condition be not fulfilled, the definition is known as असम्भव (*absurd*) ; if, again, the second condition be lacking the definition becomes *too narrow* (अ-व्याप्त) ; and, the lack of the third factor would give rise to the third variety of fallacious definition known as *too wide* (अति-व्याप्त). Thus, the above three fallacies of definition exactly correspond with the three varieties of *invalid reason* (हेत्वाभास), known as विरुद्धत्व, भागासिद्धि and साधारणत्व. Now, in the light of the foregoing discussion about the nature of valid definition, भक्ति cannot be regarded as the definition of ध्वनि, For, it is vitiated by the two fallacies known as अति-व्याप्ति and अ-व्याप्ति. भक्ति is a *too wide* definition because in cases where there is no trace of ध्वनि, there is भक्ति. As the *Vṛttikāra* states : 'तत्रातिव्याप्तिः....संभवात्'. This he elucidates further in the following sentence : "यत्र हि.....कवयो दृश्यन्ते'— Though it might be argued that in all cases of लक्षणा (based on प्रयोजन) there must be suggestion and as such it is not proper to argue that भक्ति and ध्वनि are not invariable concomitants, yet the mere existence of व्यङ्ग्य, which is प्रयोजन in this case, is not the criterion of a ध्वनि-काव्य as has been so frequently expressed. The प्रयोजन, which is व्यङ्ग्य, must be *striking* too. But even in cases, where the प्रयोजन is insignificant and devoid of any charm, the poets do employ *Indicative* or *Figurative* (लाक्षणिक) words merely in obedience to past tradition. Thus, it is plain that in such cases, the absence of ध्वनि does not agree with the absence of भक्ति, which should have been the case had भक्ति been the definition of ध्वनि. Compare Abhinavagupta's *Locana* ;—

"ननु ध्वननमवश्यम्भावीति कथं तद्व्यतिरिक्तोऽस्ति विषय इत्याह—महत् सौष्ठवम् इति। अत एव प्रयोजनस्यानादरणीयत्वाद् व्यञ्जकत्वेन न कृत्यं किञ्चित् इति भावः। महद्-ग्रहणेन गुणमात्रं

तद् भवति। यथोक्तं—'समाधिरन्यधर्मस्य क्वाप्यारोपो विवक्षित'-इति दर्शयति। ननु प्रयोजनाभावे कथं तथा व्यवहारः इत्याह—**प्रसिद्ध्यनुरोधेति**। परम्परया तथैव प्रयोगात्। वयं तु ब्रूमः। प्रसिद्धिर्या प्रयोजनस्यानिगूढतेत्यर्थः। उत्तानेनापि रूपेण तत् प्रयोजनं चकासन्निगूढतां निधानवदपेक्षत इति भावः। वदतीत्युपचारे हि स्फुटीकरण-प्रतिपत्तिः प्रयोजनम्। यद्यगूढं स्व-शब्देनोच्येत, किमचारुत्वं स्यात्? गूढतया वर्णने वा किं चारुत्वमधिकं जातम्? अनेनैवाशयेन वक्ष्यति—'यत उक्त्यन्तरेणाशक्यं यदि'-ति।।"—*Op. cit.*, pp. 142–144.

'परिम्लानं....विसिनीपत्रशयनम्'—Here the verb वदति has been used in a figurative sense, since the root वद् in its primary sense ('वद व्यक्तायां वाचि') cannot be construed with such inane things as विसिनी-पत्र-शयनम्. Nor can it be argued that the poet used this लाक्षणिक word with a view to conveying some प्रयोजन. For, the प्रयोजन, if it has any, would be स्फुटीकरणप्रतीति, and it might as well be conveyed through *denotation*. Thus, though there is no ध्वनि here, yet there is भक्ति.

'चुम्बिज्जइ......पुनरुत्तम्'—Here the term 'पुनरुक्त' is लाक्षणिक, even though there is no evident प्रयोजन for resorting to such लक्षणा. 'पुनरुक्तम् इत्यनुपादेयता लक्ष्यते, उक्तार्थस्यासम्भवात्'—°*Locana.*

'कुविआओ....महिलाओ'—'अत्र ग्रहणेन उपादेयता लक्ष्यते, हरणेन तत्परतन्त्रतापत्तिः'—°*Locana.*

'अज्जाए....सवत्तीणम्'—"कनिष्ठभार्यायाः स्तनपृष्ठे नवलतया कान्तेनोचितक्रीडायोगेन मृदुकोऽपि प्रहारो दत्तः सपत्नीनां सौभाग्यसूचकं तत् क्रीडासंविभागमप्राप्तानां हृदये दुःसहो जातः, मृदुकत्वादेव। अन्यस्य दत्तो मृदुः प्रहारोऽन्यस्य च सम्पद्यते, दुःसहश्च

मृदुरपि इति चित्रम्। दानेनात्र फलवत्त्वं लक्ष्यते।"—°*Locana*, pp. 144-145.

'पराथ ...मरुभुव:'—Here the verb अनुभवति must be taken in its *figurative sense* (लक्ष्यार्थ), as in its primary sense it cannot be construed with the nominative form इक्षु:. Compare °*Locana*. "परार्थेति। यद्यपि प्रस्तुत-महापुरुषापेक्षयाऽनुभवतिशब्दा मुख्य एव, तथापि अप्रस्तुते इक्षौ प्रशस्यमाने पीडाया अनुभवपदेन असंभवता पीड़ावत्त्वं लक्ष्यते, तच्च पीडयमानत्वे पर्यवस्यति।"—*loc. cit*.

'न चैवंविध:......विषय:'—Such instances can never be reckoned as illustrations of ध्वनि, for the प्रयोजन has no beauty at all.

TEXT

§ ४४। यत:—

उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत्॥१५॥
अत्र चोदाहृते विषये नोक्त्यन्तराशक्य-चारुत्व-व्यक्ति-हेतुः शब्दः॥

EXPOSITION

§ 44. The *Dhvanikāra* now enunciates the essential characteristic of a truly suggestive word which can be designated as ध्वनि proper ('ध्वनतीति कृत्वा').

"If any word through suggestion conveys some sense the beauty and charm of which is lost if it be expressed in any other mode, that alone can be called ध्वनि."

अत्र च......शब्द:—In the preceding *five* instances the terms वदति, पुनरुक्तम्, हरन्ति, दत्त: and अनुभवति do not communicate to us any such idea which could not have been expressed through *denotation* (अभिधा) without any appreciable loss of the charm. For example, for the *figurative* (लाक्षणिक)

word वदति one might easily substitute सूचयति which through *denotation* would have directly conveyed the self-same idea without any deterioration of the effect thereby.

It is interesting to note in this connection the words of S. T. Coleridge which seem to echo the very idea contained in the above *Kārikā* of the *Dhvanyāloka*. Coleridge speaking of Rev. James Bowyer, one of the tutors in his school-days observes :—

'In our own English compositions, (at least for the last three years of our school education,) he showed no mercy to phrase, metaphor, or image, unsupported by a sound sense, or where the same sense might have been conveyed with equal force and dignity in plainer words. *Lute*, *harp*, and *lyre*, *Muse*, *Muses*, and *inspirations*, *Pegasus*, *Parnassus* and *Hippocrene* were all an abomination to him. In fancy I can almost hear him now, exclaiming "Harp ? Harp ? Lyre ? Pen and ink, boy, you mean ! Muse, boy, Muse ? Your nurse's daughter, you mean ? Pierian spring ? Oh aye ! the cloisterpump, I suppose !"—*Biographia Literaria*, p. 4 (Everyman's Library). In a footnote on the same page, Coleridge remarks :—

"'This is worthy of ranking as a maxim, (*regula maxima*,) of criticism. Whatever is translatable in other and simpler words of the same language, without loss of sense or dignity, is bad. *N. B.*—By dignity I mean the absence of ludicrous and debasing associations."

Later on, he expresses the same feeling in almost identical terms :—

"As the result of all my reading and meditation, I abstracted two critical aphorisms, deeming them to comprise the conditions and *criteria* of poetic style ;—......secondly, that

whatever lines can be translated into other words of the same language, without diminution of their significance, either in sense or association, or in any worthy feeling, are so far vicious in their diction......I was wont boldly to affirm, that it would be scarcely more difficult to push a stone out from the Pyramids with the bare hand, than to alter a word, or the position of a word, in Milton or Shakespeare, (in their most important works at least,) without making the poet say something else, or something worse, than he does say."—*Op. cit.*, pp. 11-12.

I have quoted at length from Coleridge only with a view to directing the attention of the readers to one important fact—viz. how the intellects of great literary critics converge together on important issues. As the proverb runs : 'संवादिन्यो हि महात्मनां बुद्धयः'—"All great men think alike."

Abhinavagupta explains उक्त्यन्तरेण as :—

'ध्वन्यतिरिक्तेन स्फुटेन शब्दार्थ-व्यापार-विशेषेणत्यर्थः ।'

TEXT

§ ४५ । किञ्च –

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।

लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥१६॥

तेषु चोपचरितशब्दवृत्तिरस्तीति । तथाविधे च विषये क्वचित् सम्भवन्नपि ध्वनि-व्यवहारः प्रकारान्तरेण प्रवर्त्तते । न तथाविध-शब्दमुखेन ॥

EXPOSITION

§45. In the preceding section the *Dhvanikāra* has shown how भक्ति as a *definition* of ध्वनि is *too wide* (अति-व्याप्त) on the ground that in all the cases of प्रयोजनमूला लक्षणा,

there is no universal agreement between the two. The present *Kārikā* is meant to supply one more reason for discarding such a view, by stating that in रूढिमूला लक्षणा there is no trace of ध्वनि at all, as the प्रयोजन which is to be suggested is wanting in this variety of लक्षणा. For example, words like लावण्य, कुशल etc. are used *figuratively* to convey senses that are different from their strictly derivative meanings (व्युत्पत्ति-लभ्य अर्थ), and yet it would not be proper to designate them as ध्वनि merely because there is लक्षणा. Still that would have been exactly the case if the view put forward by the opponents —viz. that भक्ति is the definition of ध्वनि, had been adopted. Abhinavagupta explains the *Kārikā* as follows :—

"एवं यत्र प्रयोजनं सदपि नादरास्पदं। तत्र को ध्वनन-व्यापारः इत्युक्त्वा यत्र मूलत एव प्रयोजनं नास्ति, भवति चोपचारस्तत्रापि को ध्वनन-व्यापार इत्याह—किञ्चेति। लावण्याद्या ये शब्दाः स्वविषयाल्लवण-रस-युक्तत्वादेः स्वार्थादन्यत्र हृद्यत्वादौ रूढा रूढत्वादेव त्रितय-सन्निध्यपेक्षण-व्यवधानशून्याः। यदाह—'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।' इति। ते तस्मिन् स्व-विषयादन्यत्र प्रयुक्ता अपि न ध्वनेः पदं भवन्ति ; न तत्र ध्वनि-व्यवहारः। उपचरिता शब्दस्य वृत्तिर्गौणी लाक्षणिकी चेत्यर्थः। आदि-ग्रहणेन आनुलोम्यं प्रातिकूल्यं सब्रह्मचारीत्येवमादयः शब्दा लाक्षणिका गृह्यन्ते। लोम्नामनुगतम् अनुलोमं मर्दनम्। कूलस्य प्रतिपक्षतया स्थितं स्रोतः प्रतिकूलम्। तुल्यगुरुः सब्रह्मचारी इति मुख्यो विषयः। अन्यः पुनरुपचरित एव। न चात्र प्रयोजनं किञ्चिदुद्दिश्य लक्षणा प्रवृत्तेति न तद्विषयो ध्वनन-व्यवहारः॥"
—*Op. cit*, pp. 146-147.

तथाविधे......शब्दमुखेन—It might be argued, however, that if the above view be conceded, there would be no ध्वनि at all wherever such terms as लावण्य, आनुलोम्य etc. are

used. But contrary instances are not rare. The *Vṛttikāra* answers : "We do not state that there should be no ध्वनि at all wherever निरूढ-लक्षणिक terms are employed. There may be ध्वनि in such cases. But that does not compromise our position at all. For, if we analyse critically we will be able to discover that in those cases, the source of ध्वनि is not these निरूढ words (कुशल, लावण्य, प्रतिकूल, etc.) themselves, but some other factor. And as such the opinion expressed above is universally valid." As Abhinavagupta comments :—

"ननु 'देवडिति लुणाहि पलुत्रम्मिगमिज्वालवणुज्वलं गुमरिफोल्ल-परण्य' (?)-इत्यादौ लावण्यादि-शब्द-सन्निधानेऽस्ति प्रतीयमानाभि-व्यक्तिः। सत्यम्, सा तु न लावण्य-शब्दात्। अपि तु समग्र-वाक्यार्थप्रतीत्यनन्तरं ध्वनन-व्यापारादेव। अत्र हि प्रियतमा-मुखस्यैव समस्ताशा-प्रकाशकत्वं ध्वन्यते इत्यलं बहुना। तदाह—**प्रकारान्त-रेणेति**। व्यञ्जकत्वेनैव। नतु उपचरित-लावण्यादि-शब्द-प्रयोगा-दित्यर्थः ॥"—*Locana, loc. cit.*, p. 147.

TEXT

§४६। अपि च—

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्-गतिः ॥१७॥

तत्र हि चारुत्वातिशय-विशिष्टार्थप्रकाशन-लक्षणे प्रयोजने कर्त्तव्ये यदि शब्दस्यामुख्यता तदा तस्य प्रयोगे दुष्टतैव स्यात्। न चैवम् ॥

EXPOSITION

§46. The *Dhvanikāra* adduces a fresh argument, apart from all considerations of the fallacies shown above (viz. अतिव्याप्ति and अव्याप्ति), against भक्ति being the definition of ध्वनि. The contents of लक्षणा and ध्वनन are altogether different,

and in view of this, it is not proper to regard the one as the *attribute* (लक्षण) of the other. It might, however, be asked : What is the difficulty in considering the प्रयोजन too as लक्ष्य and thus dispensing with the fourth function of Suggestion. In that case, there can be raised no objection on the ground of fallacious definition. The present *Kārikā* is intended as a reply to such a possible contention. As Abhinavagupta puts it :—

"एवं यत्र यत्र भक्तिस्तत्र ध्वनिरिति तावन्नास्ति। तेन यदि ध्वनेर्भक्तिर्लक्षणं तदा भक्ति-सन्निधौ सर्वत्र ध्वनि-व्यवहारः स्यादित्यतिव्याप्तिः। अभ्युपगम्यापि ब्रूमः—भवतु यत्र यत्र भक्ति-स्तत्र तत्र ध्वनिः। तथापि यद्विषयो लक्षणा-व्यापारो न तद्विषयो ध्वननव्यापारः। न च भिन्नविषययोर्धर्मधर्मिभावः। धर्म एव च लक्षणमित्युच्यते। तत्र लक्षणा तावदमुख्यार्थविषयो व्यापारः। ध्वननं च प्रयोजनविषयम्। न च तद्विषयोऽपि द्वितीयो लक्षणा-व्यापारो युक्तः, लक्षणासामग्र्यभावात्॥— *Op. cit.*, pp. 147-48.

The प्रयोजन cannot be लक्ष्य for the simple reason-viz. that the conditions of लक्षणा are absent here. To be लक्षणा, there must be मुख्यार्थबाध and प्रयोजन. In the expression 'गङ्गायां घोषः' the term गङ्गा signifies तट through लक्षणा because the primary sense of the term, viz. प्रवाह, is incompatible and because there is some end in view—viz. the cognition of शैत्य and पावनत्व originally appertaining to the stream on the bank thereof. But शैत्य-पावनत्व too cannot be similarly conveyed through लक्षणा, for in that case it should be shown that even the secondary sense of the term गङ्गा, viz. तट, is incompatible, which is, however, not the case. Nor is there any प्रयोजन for resorting to a second लक्षणा. And if, for the sake of argument, some प्रयोजन be forged out, that would entail a *regressus ad infinitum* (अनवस्था), because the second प्रयोजन

would again be conveyed through लक्षणा, for the justification of which a third प्रयोजन would have to be posited and so on. Abhinavagupta explains the *Kārikā* as follows :—

"मुख्यां वृत्तिमभिधाव्यापारं परित्यज्य परिसमाप्य गुणवृत्त्या लक्षणारूपया अर्थस्य अमुख्यस्य दर्शनं प्रत्यायना, सा यत्फलं कर्मभूतं प्रयोजनरूपमुद्दिश्य क्रियते, तत्र प्रयोजने तावद् द्वितीयो व्यापारः। न चासौ लक्षणैव। यतः स्खलन्ती बाधक-व्यापारेण विधुरीक्रियमाणा गतिरवबोधनशक्तिर्यस्य शब्दस्य तदीयो व्यापारो लक्षणा। न च प्रयोजनमवगमयतः शब्दस्य बाधकयोगः। तथाभावे तत्रापि निमित्तान्तरस्य प्रयोजनान्तरस्य चान्वेषणेन अनवस्थानात्। तेनायं लक्षण-लक्षणाया न विषय इति भावः। दर्शनम् इति ण्यन्तो निर्देशः॥"—°*Locana*, pp. 148-49.

Mammaṭabhaṭṭa reproduces the very words of the *Dhvanyāloka* and its commentary °*Locana* in his *Kāvyaprakāśa*. Compare : "यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते। फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया॥"—प्रयोजन-प्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः। तथाहि—"नाभिधा समयाभावात्"। 'गङ्गायां घोषः' इत्यादौ ये पावनत्वादयो धर्मा-स्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः संकेतिताः॥ "हेत्वभावान्न लक्षणा"॥ मुख्यार्थबाधादित्रयं हेतुः। तथा च—

"लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः॥"

—यथा गङ्गा-शब्दः स्रोतसि सबाध इति तटं लक्षयति, तद्वद् यदि तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः। नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबन्धः। नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्। न च गङ्गा-

शब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः ।।

"एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी ।।"

—एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत् ।।—*Ullāsa* II.

TEXT

§ ४७। तस्मात्—

वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता ।

व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम् ॥१८॥

तस्मादन्यो ध्वनिरन्या च गुणवृत्तिः । अव्याप्तिरप्यस्य लक्षणस्य । नहि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षणः, अन्ये च बहवः प्रकारा भक्त्या व्याप्यन्ते । तस्माद् भक्तिरलक्षणम् ॥

EXPOSITION

§ 47. In the present *kārikā* the Dhvanikāra winds up the above discussion. 'वाचकत्वाश्रयेणैव....लक्षणं कथम्'—लक्षणा depends invariably on वाचकत्व or अभिधा, since the incompatibilty of the मुख्यार्थ or primary sense first presented through the function of *Denotation* or अभिधा is the *conditio sine qua non* of लक्षणा, whereas ध्वनि, which is completely independent of अभिधा is based solely on *Suggestion*, a function which is found to belong to *unmeaning sounds* (अवाचकवर्ण) even. This being the case it is absurd to maintain that ध्वनि and भक्ति are identical or the one (ध्वनि) is *defined* or *determined* by the other (लक्षणा or भक्ति). As Abhinavagupta explains :—

"उपसंहरति—तस्मादिति । यतोऽभिधापुच्छभूतैव लक्षणा, ततो हेतोर्वाचकत्वमभिधाव्यापारमाश्रिता तद्बाधनेनोत्थानात् तत्पुच्छभूतत्वाच्च गुणवृत्तिः गौण-लाक्षणिकप्रकार इत्यर्थः । सा कथं ध्वनेर्व्यञ्जनात्मनो लक्षणं स्यात् ? भिन्नविषयत्वादिति । एतदेवोप-

संहरति—तस्मादिति। यतोऽतिव्याप्तिरुक्ता तत्प्रसङ्गेन च भिन्न-विषयत्वं तस्माद् हेतोरित्यर्थः ॥—*Op. cit.*, p. 151. Mammaṭa-bhaṭṭa's arguments are substantially based on the *Dhvanyāloka* and its commentary, though he notes a few more points that differentiate लक्षणा from व्यञ्जना. Compare :—

"ननु 'रामोऽस्मि सर्वं सहे' इति, 'रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्' इति, 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते, विशेषव्यपदेशहेतुश्च भवति, तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम ? उच्यते—लक्षणीयस्यार्थस्य नानात्वेऽपि अनेकार्थशब्दार्थाभिधेयवन्नियतत्वमेव। न खलु मुख्येनार्थेन अनियत-संबन्धो लक्षयितुं शक्यते। प्रतीयमानस्तु प्रकरणादि-विशेषवशेन नियतसम्बन्धोऽनियतसंबन्धः संबद्ध-संबन्धश्चेति द्योत्यते। न च—'अत्ता एत्थ णिमज्जइ' इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थ-बाधः, तत् कथमत्र लक्षणा ? लक्षणायामपि व्यञ्जनमवश्य-माश्रयितव्यम् इति प्रतिपादितम्। यथा च समय-सव्यपेक्षाऽभिधा तथा मुख्यार्थबाधादित्रय-समयविशेष-सव्यपेक्षा लक्षणा। अत एवा-भिधापुच्छभूता सेत्याहुः।

"न च लक्षणात्मकमेव ध्वननम्, तदनुगमेन तस्य दर्शनात्। न च तदनुगतमेव, अभिधावलम्बनेनापि तस्य भावात्। न चोभयानुसार्येव, अवाचकवर्णानुसारेणापि तस्य दृष्टेः। न च शब्दानुसार्येव, अशब्दात्मक-नेत्रत्रिभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धः—इत्यभिधा-तात्पर्य-लक्षणाख्यव्यापारत्रयातिवर्त्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव ॥'—*Kāvyaprakāśa*, Ullāsa V.

अव्याप्तिः....व्याप्यन्ते—Having thus refuted the argument of the opponents, endeavouring to define ध्वनि by means of लक्षणा on the ground of the fallacy of अतिव्याप्ति, the

